वा चर्चस्यात्। यत्तु काव्यसमस्या पूरणमित्युक्तं तस्य निग्नार्थत्वात्। कलास
मस्या चेत्यंत्रांतर्भावः। तस्या मिति। गोष्ठ्यां चर्चविसामा प्रीतिनिबंधनार्थं
वस्त्रादिदानेन परस्परस्य कलाः एजाः स्युः उज्वलाश्चयास्ता लोककांता लोकमनोहा
राः प्रीतिक्षिमानाः प्रीत्यनुरूपाश्चप्रहारिताः परिचारिकैरानायिताः। समापनमा
ह। परस्परभवनेषु -- यानकानि। सूत्रं। परस्परभवनेषु चेति एकस्यैकदा
भवनेऽन्यस्य वा परुस्यमासस्य वा तत्र योमध्यतया प्रज्ञाते हनि आपान
कानि पानगोष्ठ्यः स्युः। तत्रेत्यापानकेषु विधिमाह। मधुमैरेयसुरासवान्
विविधलवणफलहरितशाकतिक्तकटुकाम्लोपदंशान् वेश्याः पाययेयुः

युरनुपिबेयुः एतेनउद्यानगमनंव्याख्यातं। सूत्रं। मधुमाध्वीकंमैरेयासवौमद्य
विशेषाः। तथाचोक्तं। मेषशृंगीत्वक्क्वाथाभियुतोगुडःप्रतीवायः। पिप्पलीमरि
चसंचाराः। त्रिफलायुक्तोमैरेयः। कपित्थपत्रफाणितप्रस्थोमधुनश्चासवयो
गइति। सुराशैवल्कलतंदुलाभ्यांनिष्पन्नोगुडःतत्रनिक्षिप्यतेमद्यमितिद्रक्ष
वो -- द्योपादानंत्रेधाख्यापनोर्थं तथाचोक्तं। गौडीपैष्टीचमाध्वीचविज्ञेयात्रि
विधासुराः। अत्रसुराशब्दःसामान्यवाचीद्रष्टव्यः। एवंचविविधपानाद्यापा
नकंभवति। विविधानिलवणतिक्तरसन्मूल्यइष्टानिहरितकटुकानिचाश्रि ५०
शुपर्णादीनिभवदंशायेषामिति। तान्वेश्याःपाययेयुःअनुरथनाःपुरःसरं
स्वनुपिबेयुःयथाशास्त्रादौपिबन्तिगौरवानुरागोनप्रकाशितःस्यात्। अत्रस

हस्यर्थइतिदेशप्रवृत्तिरपेक्षणीया। एतेनेतिआपानकविधिनाउद्यानगतेर
प्ययमेवआपानकविधिःकार्यइत्यर्थः। तत्रोद्यानगमनेविशेषमाह। तत्रपूर्वा
ह्णएवस्वलंकृतास्तुरगाधिरूढावेश्याभि -- रूपरिचारिकानुगतागच्छेयुःदे
वसिकींचयात्रांतत्रैवानुभूयकुक्कुटलावकयुद्धद्यूतैःप्रेक्षाभिरनुकूलैश्च
चेष्टितैःकालंगमयित्वाअपराह्णेगृहीततदुद्यानोपभोगचिह्नास्तथैवप्रत्याव्र
जेयुः -- नरचितोद्ग्राहोदकानांग्रीष्मेजलक्रीडागमनमाख्यातं। सूत्रं। नराहिग
तानादेवसिकीयात्रासंपद्यते। स्वलंकृताःगृहीतवैहारिकवेषास्तुरगाधिरूढा
स्तुरगानांलक्षितयानत्वात्। वेश्याभिःसहेतिताश्चैतिपिपश्चादयतोवातुर
गमारोहयितव्याः। परिचारिकाःयथास्वंकर्मभिःपरिचरंतियास्ताभिरनु

गताः पश्चिमेऽस्येसस्यैवातत योग्यतया प्रज्ञातेऽह्नि गच्छेयुः दैवसिकीं यात्रां प्रत्य
हं क्रियमाणां शरीरस्थितिं तथैवोद्यानेषु नृत्यकुक्कुटयुद्धद्यूतैः सजीवनिर्जी
वैर्नटादिप्रयुक्तैर्निरनुकूलैश्च नचेष्टितैर्यथास्वं वेश्यापतियुक्ताः कालं गमयि
त्वा पराह्णे प्रशान्तवेलायां तथैवेति स्वलंकृतास्तुरगाधिरूढाः सह वेश्याभिः
परिचारानुगत इति। विशेषोत्र गृहीतोद्यानोपभोगचिह्ना इति तदुद्यान
मुपभुक्तमिति यानि लक्षयंति कुसुमस्तवककिशलयादीनि तानि गृही
तानि शिरःकर्णकंठेषु कृतानि प्रत्याव्रजेयुः प्रतीयमाना गच्छेयुः। एतेनेत्युद्या ५१
नगमनविधिना तत्रापि गमनं दैवसिकायात्रानुवर्तनं च व्याख्यं। किंच
गृहीततदुद्यानोपभोगचिह्ना इति तेन तत्रैव प्रायशो भ्रमणं तन्नृत्तमिति नै

नैमित्तिकवर्गे प्रथमोक्तं। योत्र विशेषस्तमाह। रचितोद्ग्राहोदकानमिति उद्ग्राहम
विद्यमानकं नीराद्युदकं यस्य तोयस्थानस्य तदुद्ग्राहोदकं वापीदीर्घिकादिकं वि
न्वितमिति स्वार्थे कन्यं तादृग्गुणेनाद्धृतप्रत्ययेन रूपं रचयतीयन्त्र इति च इदं त
त्वान्नवदृष्टिः। तीर्थविन्यासादिभिः कारितरचनमुद्ग्राहोदकयैर्नागरकैरिति
ग्रीष्म इति अन्यदा तु पुनःपुनर्निमज्जनोन्मज्जनोदकवाद्यविद्याताडिप्रका
रायाः क्रीडाया अत्र संभवात्। समस्या क्रीडा अप्रे। यक्षरात्रिः कौमुदीप्रचारः
सुवसंतकः सहकारभंजिका बिसखादिका नृपखादिकोनवपत्रिकोदकक्ष्वे
डिका पांचालानुयानमेकशाल्मली कदंबकयुद्धानि तास्ताश्च माहिमत्यो
देश्याश्च क्रीडा जनेभ्यो विशिष्टतरमाचरेयुरिति संभूय क्रीडा। सूत्रं। यक्ष

रात्रीः सुखरात्रीयक्षाणां तत्रसंनिधानात्। तस्यांप्रायशोलोकस्यद्यूतक्रीडा। कौम
दीजागरः। आश्वयुज्यांहिपौर्णमास्यांकौमुद्यांज्योत्स्नायाप्रकर्षेणप्रवृत्तेनतव
दोलाद्यूतप्रासाक्रीडाः। सुवसंतोमदनोत्सवस्तत्रनृत्यगीतवाद्यप्रायाक्रीडा।
एतामाहिमत्यः क्रीडादेश्याश्चाह सहकारभंजिका। सहकारफलानांभंज
नंयत्रक्रीडायां। अभ्यूषखादिका अभ्यूषाणांकंदविशेषाणांखादनंयत्र। वि
सखादिकामृणालानांखादनंयत्रसरस्समीपवासिनां। नवपत्रिका। प्रथ
मवर्षणेनप्ररूढनवपत्रासुवनस्थलीषुयाक्रीडासाप्रायेणअटवीस ४२
मीपवासिनांआटविकानांच। उदकक्ष्वेडिका उदकक्ष्वेडैःक्रीडायस्यां।
क्रीडायांसामध्यदेश्यानां। यस्यांसुमनिर्भरंशाल्मलीवृक्षमाश्रित्यतत्र

त्यकुसुमाभरणानांक्रीडायथावैदर्भाणांकदंबयुद्धानिकदंबकुसुमैः प्रह
रणंतैर्द्विधाबलंविभज्ययुद्धानिकदंबग्रहणंसुकुमारवस्तुग्रहणमाना
र्थंयच्छाष्टिकादियुद्धानितानिकार्याणि। यथापौंड्राणांयुद्धंक्वचित्क्वचिद्दृश्य
ते। तास्ताश्चेति। यायालोकेप्रवृत्तिरेवंमाहिमत्यइति। महिमामहत्वंत
द्विद्यतेयासामितिसंज्ञायांमत्वाम्यामितिप्रत्ययः सर्वदेशव्यापिनइत्यर्थ
ःदेशेनवादेश्याप्रादेशिन्यइत्यर्थः। जनेभ्योविशिष्टतरामितिघटादयो
नागरकाणामीतिसमस्यात्तुसाधारणाः। तत्रजननागरकाश्चक्रीडंतीति त
स्मात्तेभ्योविशिष्टतरमाचरेयुः। नागरकत्वद्योतनार्थंसंभूयक्रीडाइतिआ
सुनागरकाणांद्रव्यमुपहार्थंसंभूयक्रीडनात्। एकचारिणश्चविभवसा

मथ्यन्तिगणिकायाः सखीभिर्नागरकैश्चसहचरितमेतेनव्याख्यातं। सूत्रं। नाग
रिकाश्चानानावालदृष्टदोषाद्वायः कश्चिदेकएवचरतितिस्यस्त्वभिमवानुरू
पेणपरिचारिकाभिस्सहयहराश्चादयसमस्याएवस्युः। एतेनेति। स्थानग
तन्यासनित्यनैमित्तिकविधिनायथासंभवंगणिकायानायकचचरिवरि
तंव्याख्यातं। तत्रनागराणांगणिकास्थानेसख्योद्यानेनागरिकाइति। उपना
गरकाणांलाकुणद्वारेणवृत्तमाह। अविभवस्तुशरीरमात्रोमल्लिकाफेन
ककषायमात्रंपरिच्छदः पूज्याद्देशादागतः कलासुविचक्षणः तदुपदेशे ५२
नगोष्ठ्यां वेशेचसाधयेदात्मानमितिपीठमर्दः॥ देशाद्देशोविशेषणार्थः। यस्तु
निःकिंचनोयथोक्तंनागरिकवृत्तंवृत्तिर्हेतुमेयोगाः शरीरमात्रःपुस्तक

सत्राद्यभावात्परिवारकद्वितीयः यथोत्पादितविज्ञानावाद्देशाद्दिनकः माल्लि
काफेनशासनीकाशरीरधारणात्पूर्वंनागरकाचार्यैः संकेतितामल्लमल्लिकाधा
रणइतिविधोपादानुसातस्याष्टघतएवआसनार्थत्रायति। प्रवृत्तविषयेछा
त्वाच्चजंघाघर्षणार्थकेनककषायविलिनन्मात्रपरिच्छदोवित्तवोयस्यास्ति
पीठकाद्यासनंनश्चनार्हति। पूज्याद्देशात्दशाल्लिकलाविदग्धपूषितात् तत्रत्यए
वदेशादिदृष्टयागतः। कलाकौशलेषुशालःस्वदेशोचगीतादौचक्षुःषाष्टिपांचा
लिकीचाधीतवान्। तदुपदेशेनगोष्ठ्यांनागरिकाणांविशोचितैवेश्याजनो
चितवृत्तेसाधयेदात्मानमितिआचार्योनिष्पादयेदित्यर्थः। सपीठमर्दः।
उपदेशदानेअधिकृतत्वात्। माल्लिकावंपीठंमृद्नातितीठत्वा। एतेनआ

चार्यकृतमस्य वृत्तं। भुक्तविभवस्तु गुणवान् सकलत्रो वेशे गोष्ठ्यां च बहुमतः त
दुपरीतो विषयेन्यः अविभवस विभवस्तु नागरिक एव स्यात्। तत्रत्यो नान्य
स्माद्देशादागतोऽन्यस्मादागतो भुक्तविभवस्तु आगंतुकः पीठमर्द्दश्च एव गुण
वान्नायकगुणयुक्तः। प्राक्तननागरिकत्वात्। सकलत्रः सानुबंधत्वात्। तस्य
देशत्यागी बहुमत इति बहुमतं यस्य विशेष-- ज्ञानात्। तदुपजीवी वा विटगो
ष्ठ्युपजीवी। वृत्तिमन्यामनिच्छन्। वेश्याजनं नागरकजनं चोपजीवतीति। तदु
पजीवित्वात पोषः परस्य रसं देशं विटतीति कथयतीति विटः। विटशाब्द ४४
इति धातुपाठात्। वक्ष्यति च विटपेः पुरोगा प्रीति-- यदिति तेन तदुपजी
वद्वृत्तमेवास्य वृत्तं। एकदेशदृष्टैस्तु क्रीडनको विश्वास्यश्च विदूषको वैहासि

विद्य

कोवा एते वेश्या-- नागरिकाणां च मंत्रिणः संधिविग्रहनियुक्ताः। सूत्रं यस्तु गी
तादीनां एकदेशज्ञः सो विभवो भुक्तविभवो वा शरीरमात्रः सकलत्रः तत्रत्य आगं
तको वा पूर्ववृत्तसंभवात्। क्रीडनको विश्वास्यश्च भवति। विशेषतः गोष्ठ्यां च वि
श्वास्यतामुपगम्य परिहासशीलवृत्त्या वर्त्तत इत्यर्थः। सच्चे वेश्यां नागरिकं वा
क्वचिन्मायं तं लब्धप्रणयत्वादपवादत इति विदूषकः। क्रीडनकत्वाच्च वेशे
गोष्ठ्यां च विविजध्ये न हासेन चरतीति वैहासिकः इत्युभयनामान एते नाग
रकाणां पार्श्ववर्त्तित्वात् उपनागरिकामंत्रिणः संधिविग्रहनियुक्ता इति सा
मान्यं वृत्तं संधिविग्रहयोः निकर्मणि चनियोक्तव्याः। नाश्च संधिविग्रहा
र्थं कृत्तनाव चालनाश्च कादिन्य इत्युच्यंते। यात्रावशाद्भूमवाहिनो वृत्तमाह।

ग्रामवासीचसजातान्विचक्षणान्कौतूहलिकान्प्रोत्साह्यनागरकजनस्यवृत्तंव
र्णयन्श्रद्धांजनयन्तदेवानुकुर्वीतगोष्ठीश्चप्रवर्त्तयेत्।संगत्या।जनमनुरंज
येत्।कर्मसुचसाहाय्येनचानुगृह्णीयात्।उपकारयेच्चेतिनागरकवृत्तं।सू
त्रं।ग्रामवासीचेतिसजातान्समानजातीयान्तत्रापिविचक्षणान्प्राज्ञान्कौ
तूहलिकान्कौतुकवतःप्रोत्साह्यकथमित्याह।वृत्तंवर्णयन्।अमुष्मिन्नगरे
इत्थंगोत्रपुत्राणांनागरिकाणांलोकमनोहारिचेष्टितंदृश्यते।भवतामपि
युक्तंवेषचेष्टितादिरूपंजीवितफलंतदनुकर्तुमितिश्रद्धांजनयन्यात्रा ४५
मपितद्दर्शनेनगोष्ठीश्चप्रवर्त्तयेत्।तैःसहसंगत्याजनमेनमनुरंजयेत्मे
त्रमित्यर्थः।साहाय्येनानुगृह्णीयात्।यात्राविवाहादिषुप्रवर्त्तनानां।उपचार

येच्चपरस्परमुपचरंतं।तैश्चैषांचबलसमस्याकलासमस्याचेत्युक्तं।तत्रवि
शेषमाह।भवंतिचात्रश्लोकाः।नात्यंतंसंस्कृतेनैवनात्यंतंदेशभाषया।कथां
गोष्ठीषुकथयन्लोकेबहुमतोभवेत्॥१॥यागोष्ठीलोकविद्विष्टायाच
स्वैरविसर्पिणी।परहिंसात्मिकायाचनतामवतरेद्बुधः॥२॥लोकचित्तानुव
र्त्तिन्याक्रीडामात्रैककार्यया।गोष्ठ्यासहचरन्विद्वान्लोकेसिद्धिंनियच्छती
ति॥३॥कश्चिद्देवसंस्कृतंवेत्तिदेशभाषांकथाकाव्यकलाविषयांचचर्चयेगो
ष्ठीति।यदास्वयंगोष्ठींनप्रवर्त्तयेत्तदान्यप्रवर्त्तितांयायादाह।यापियालो
कविद्विष्टालोकस्यासंमतास्वैरविसर्पिणीस्वातंत्र्येणप्रवृत्तानिरंकुशेत्य
र्थः।परहिंसात्मिकापरदूषणपरानतत्रावतरेद्बुधंस्यैतत्रह्यवतरणमनु

वा॰का॰जा॰
वा॰सू॰जा॰
५६

धस्यदृश्यते। कथासविस्तरे दिव्यात्। लोकचित्तानुवर्त्तिन्या क्रीडामात्रैककार्यये
ति। लोकचित्तानुरंजनं क्रीडा च फलं गोष्ठी सिद्धिं नियच्छति प्राप्नोति लोके सि
द्धो भवति किं पुनः स्त्रीषु इत्यर्थः। स्वयं गोष्ठीप्रवर्त्तनीयायमेव विधिः॥ ॥
इति वात्स्यायनीय कामसूत्रटीकायां जयमंगलाभिधानायां विदग्धांगना
विरहकातरेण गुरुदत्तेंद्रपदाभिधानेन यशोधरेण एकत्र सूत्रभाष्यायाप्र
थमेधिकरणे नागरिकवृत्तं चतुर्थोध्यायः॥४॥ ॥नायकसहायदूतकर्मवि
मर्श उच्यते। सूत्रं। गार्हस्थ्यमधिगम्य नागरिकवृत्तं तद् इत्युक्तं तत्र के स्युः सहायेः ५६
किंच दूतकर्मेति तेषां विमर्शो निरूपणमिति नायकसहायदूतकर्मविमर्श
उच्यते। इत्यर्थः। नायक इति पुमान् स्त्रीत्य– –पनिर्देशात् नायकापुत्राय

तः स्वैरिणीयमन्यतोपि बहुशः खंडितचारित्रा तस्यां वेश्यायामिव गमनमु
त्तमवर्णायामपि न धर्मपीडां करिष्यति पारदारिकं एष बभ्रोवाचेत्युक्तं। त
त्र विपर्यस्तेयुरर्थमाह। स यदा मन्यते सूत्रं। स इति नायक मन्यते अधि
गच्छेत्। स्वैरिणीयं स्वैरिणी स्वतंत्रा तदेव दर्शयति अन्यतोपि बहुशो व्य
वसितचारित्रा तस्यां वेश्यायामिव पुनर्वर्णगमनमुत्तमवर्णिरायामपि
न धर्मपीडां करिष्यति पुनर्भूरिपराया। सूत्रं। अन्येति। यथा मामभियुं
जानात्री क्षं खंडयति। तथा नेष्यपि बहून् वारान् व्यवसितचारित्रा खंडि
तत्रीक्षा ततश्च वेश्यातुल्यात तस्यां वेश्यायामिव पुनर्भावमित्येनान्वयः।
यतः। एकस्मात् द्वितीयं प्रा– –नन्तः। सा च न बाहुशः खंडितचारित्रेति स

मानोदृष्टांतः उत्तमवर्णिन्यामिति किमसवर्णाधमवर्णयोरेवं मन्यते — पि
न दोषः। यथोक्तं। जात्सकामुकिवत्सावानदद्यादात्मविशुद्धया वक्तृणामि। पिव
र्णानां नारीर्हत्वा वध्वौष्ठताइति। अस्यार्थः। जात्संजयधर्मतुंवं ब्राह्मणायद
द्यात्। क्षत्रियां कार्मुकं वैश्यां वत्सं शूद्रामविधमिति। यत्र हिंसापि फल्गुदो
— — त्रान्निगमनन कस्यापि धर्मेपि घातिस्यादित्याह। गमनमपि कारणव
शात्क्रियमाणं न धर्मपीडां करिष्यति। अधर्मस्याभावात् पुनर्भूरियं कथ
मित्याह। अन्यपूर्वविरुद्धानात्रशंकास्ति। अन्यः पूर्वो यस्याः सेयं क्षतयोनि ४१
रनेनावरुद्धा संगृहीता नात्रशंकास्ति। गमनेनाधर्मस्यादित्यनुत्तमवर्ण
नीत्वात्। तत्र यद्यपि धर्मस्य पीडा नास्ति। अशंकाभावात्तथापि न सुखं निमि

तीक्षत्य प्रवर्त्तेति निषिद्धत्वात् किंतु वक्ष्यमाणमेव कारणं। तेन विषयावि
शुध्यर्थमिदमासंबुक्तं। यथोक्तं। विशुद्धिविषयस्यादौ कारणानि च तत्वतः।
प्रसमीक्ष्य प्रवर्त्तेत परस्त्रीषु न भावतः इति। ९। कारणान्याह। पतिवा महांत
मीश्वरमस्मद्मित्रसंसृष्टामियमवगृह्य प्रभुत्वेनचरति। सा मया संसृष्टा
तस्मादेनं व्यावर्त्तयिष्यति। सूत्रं। स्वशत्रुमित्रं च व्यावर्त्तयति। सा मया संसृ
ष्टास्नेहात् संयोगात्प्रवृद्धस्नेहान्तस्मादेनं व्यावर्त्तयिष्यति तस्माद्मित्रा
त्रपकर्तुकामात् पतिं प्रनर्वर्त्ती — व्यावर्त्तयिष्यति। शिष्टत्वाद्योमेन
विष्यति अन्यथा महांतमीश्वरमाश्रितो मामेवापकृतपुरुषार्थंहिनिष्यात
विरसं वा मयि सत्त्वमकर्तुकामं प्रकृतिमापादयिष्यति। सूत्रं। विरसंवेति

कार्यवशान्मयि वि — पतिसक्तमप्रतिविधेयमकर्त्तुकामं करात्मस्यायक
रिष्यामीति बहुत्वनुसार्यं प्रकृतिमापादयिष्यतीति। प्रजवंतीति मयासंसृष्टा
पूर्वविश्लेषभावं नेष्यतीति तया वा मित्रीकृतेन मित्रकार्यममित्रप्रतीघात
मन्यद्वा दुःप्रतिपादकं कार्यं संसाधयिष्यामि। सूत्रं। तयावेति। प्रजवंत्याम
या संसृष्टया मित्रीकृतेन तस्याः पत्या मित्रकार्यं तत्साध्यं मित्रकार्यं तदर्थं
हि प्राणानपि त्यजेत् नरकमपि विशेत्। अमित्रप्रतीघातं स्वशरीरत्राणा
र्थमन्यद्वा स्वकार्यं दुःप्रतिपादं दुःसाधकं साधयिष्यामि। संसृष्टो वानया ह ४८
त्वास्याः पतिं अस्माद्भाव्यं तदैश्वर्यमिवमधिगमिष्यामि। सूत्रं। संसृष्टो वान
येति। संप्रयोगादाहितस्नेहया कृतसंधिकोहत्वास्याः पतिं दूषयन्मित्रत्वा

तद्विषंतं हन्तीदंतेनास्म अस्या वा मैश्वर्यमपि तदा स्वकीयमेनाद्यमित्यर्थः
एकुलं हत्वामर्थो तोऽपि गृहाद्यालिङ्गनेन प्रसह्य भुज्यते तत्प्राप्स्यामि। ततोऽस्या
नतायित्वाद्यापादनमपि नाधर्माय। निरत्ययं वास्यागमनमर्थानुबद्धमहं
च निस्सारत्वात् क्षीणवृत्त्युपायः। सोऽहमनेनोपायेन धनमतिमहद् कृच्छ्रा
दधिगमिष्यामि मर्मज्ञा वा मामपि दृढमभिकामा मामनिच्छंतं दोषं विख्याप्य
नदूषयिष्यतीति। सूत्रं। निरत्ययं रहस्याभावात् निर्दोषमन्यत्र एयेतद्दृष्ट
वं अर्थानुबद्धमाढ्यत्वादस्याः अहं च निःसारत्वात् निर्द्रव्यात् क्षीणं वृत्त्यु
पायद्वृत्तिः वृत्तिर्जीविका तदुपायः कृष्यादि स क्षीणो यस्येति। सोऽहं कृच्छ्र
बन्धरणासमर्थो निनोपायेनाभिगमनलक्षणेन तद्धनमतिमहद्दुमादि

साधनमधिगमिष्यामि। स्वयाऽधिगमेनाधिगच्छेदितिमन्यते। अरुच्छ्रा
दिति। तयास्नेहाद्गृह्यमानं अन्यथादृष्टादृष्टसाधनं नस्यात्। तस्मात्कुटुं
बार्थमकार्यमपिकार्यंस्यात्। तथाचोक्तं। माताहृद्धापिताचैवसाध्वीभार्या
सुतः शिशुः। अप्यकार्यशतंकृत्वाभर्तव्यामनुरब्रवीत्। मयीदृढमपीयंनिका
मेति। अन्निमुखेनकामयतइत्यनिकामा। इदंमयिजातरागेत्यर्थः। मान
मिच्छंति। स्वतोन्यस्माद्वादोषात्। दोषविषयख्यापनेनमर्मज्ञत्वात्। लोके
दूषयिष्यति। राज्यकामुकोयमितियेनमेविनाशः स्यात्। राजापथ्यकारी ५८
ति। असद्भूतंवादोषंश्रद्धेयंदुःपरिहारंचहेष्यतियेनमेविनाशः स्यात्।
सूत्रं। असद्भूतंचेति। मयासंप्रयुयुक्षुरयमितिमिथोवदोषामिमुखा

प्यश्रद्धेयं। कृतकमदनलेखेनजातप्रत्ययमेवंचदुःपरिहरंयिहेष्यतिस
मारोपयिष्यतियेनमेविनाशः स्यात्पारदारिकइति। आयतिमंतंवावश्यं
पतिमतोविभिद्यद्विषतः संग्राहयिष्यति। सूत्रं। आयतिमंतंचैवावश्यमाव
मुक्तपतिंवश्यंयथोक्तकारिणंमत्तोविभिद्यमत्तोनियच्छती। मित्रीभूतं। विश्लिष्य
द्विषतः। संग्राहयिष्यतिअस्मच्छत्रुमैत्रीं सर्वंस्वकारयिष्यतिततश्चसंगृही
तप्रभावामामाहनिष्यतिस्वयंवातैः सहसंसृज्येतमदवरोधानांदूषयितान
दस्याहमपिदारानेवदूषयन्प्रतिकरिष्यामि। सूत्रं। स्वयंवातैः संसृज्येत
समर्थैरस्मदुपघातार्थंमदवरोधानांचेति। अस्मत्परिगृहीतानांदाराणा
अभिगमनेनदूषयन्प्रतिकरिष्यामि। राजानेतृवन्निनि — वासस्यनिर्हरिष्या

मि। सूत्रं। राजनियोगाद्वेति। राज्ञा ह्यमर्थ्यन्तरं निरूपयितुं नियुक्तः। तमुपायां
तराभावादस्य विश्वस्तया संसृज्य निःक्रामयिष्यामि गुरुत्वात्स्वामिकार्यस्य
। यामन्यां कामयिष्ये सास्य वशगा तामनेन क्रमेणाधिगमिष्यामि। कन्याम
लभ्यां वात्माधीनां अर्थरूपवतीं मयि संक्रामयिष्यति। ममामित्रो वास्याः पत्या
सहैकीभावमुपगतः। तमनया रसेन योजयिष्यामि इत्येवमादिभिः कारणैः
परस्त्रियमपि प्रकुर्वीत। सूत्रं। यामन्यामिति। प्रस्तुतनायिकया अन्यां प्र
कृष्टकारणवशात् कामयिष्ये सास्या इति प्रस्तुतनायिकाया वशगा यथो ५०
क्तकारिणी। तामप्रस्तुतामुपायान्तराभावादनया संक्रमं लम्भयिष्या
मि। अलभ्यां मया निर्द्धनत्वादियोगात् आत्माधीनां तदायत्तां अर्थरूप

नवंतीं त्रिवर्गहितुं मयि संक्रामयिष्यति। कन्याम् इति सा वा संप्रयुज्यमाना उ
नयं संघटयीयतीति। ममामित्रो वा प्राणहरः। अस्याः पत्या सहैकीभाव
मुपगतः। साहासनशयनयानभोजनादिभिः। प्राक् पतिममित्रसंसृष्टमि
तिः संश्लेषमात्रमुक्तं। तमनया संसृष्टया रसेन कालान्तरप्राणहारिणा वि
षेण योजयिष्यामि। एवमादिकारणं। यदा मन्येतेति प्रवर्त्तते तदा प्रकु
र्वीत प्रपूर्वः करोतिरत्रागमे वर्त्तते इति। साहसिकं आत्मनि पदेषु न
केवलं रागादेवेति परपरिग्रहगमनकारणानि। एतैरेव कारणैर्महामा
त्रसंबद्धा राजसंबद्धा वा तत्रैकदेशचारिणी काचिदन्या वा कार्यसंपादि
नी विधवा पंचमीति चारायणः सैव प्रव्रजिता षष्ठीति सुवर्णनाभः गणे

कायादुहितापरिचारिकावा॥ऽनन्यपूर्वसिसर्मघोटकमुखः।उत्क्रांतबालभावा
दकृक्षयुवतिरूपचारान्यत्वादष्टमीतिगोनर्दीयः।कार्यांतराभावादेतासाम
।पिपूर्ववत्स्वियोपलक्षणंतस्मात्तस्रएवनायिकाइतिवात्स्यायनः॥निस्रत्वा
त्तृतीयाप्रकृतिपंचमीत्येके।कृत्रानरागेणविषयस्याश्रद्दत्वात्प्रकुर्वीत
।किंतुकारणोरित्यर्थः।एतैरितियथोक्तैर्विधवापंचमीतिसंबंधः।प्राक्
जीवतनष्टेकेतिविशेषस्तत्रापिपत्युरभावात्।महामात्रेणराकायस्तावा
संबंधात्तत्रैकदेशचारिणीतदीय—दुवैकदेससंवल्हिकात्रन्यावाका ५१
।चिदन्यजनसंवादासंपादिनीयज्जनसंबद्धातत्कार्येषुव्याप्रियमाणाश्रा
ऽश्रुतिस्तेषुविधवास्वैरिणीपुनर्भूयती।सेवेतिविधवाप्रव्रजिताराजन

मद्दामात्रयोरन्यस्यवासंबद्धातत्तुल्यान्युपगच्छंती।नत्रापिपूर्ववत्कारणा
।नियोजयेत्।गणिकायादुहितानन्यपूर्वपुरुषरूषेणसंसृष्टापरिचारिका
वात्वंद्रापीडस्येवपत्रलेखातत्रपूर्वविशेषाकन्यानासावक्ष्यमाणपाणि
ग्रहणेनेशाक्षिप्यते।द्वितीयाकन्यायथतपाणिनयिकंपरिचरतीतिविशे
षातो।उत्क्रांतबालभावाकृक्षयुवतिरितिकृक्षकान्येवोढासतीकालेनाक्रांत
बालभावासमुपारूढयौवनाकृक्षभावाकृक्षयुवतिरूपचारान्यत्वाद्द
त्युपचारभेदात्सातिनकस्यैन्यावदुपाचरेत्।कन्यायामुपचाराअपरि
स्फुटविकल्पेनचप्रयुज्यतेप्राप्तयौवनायास्तुपरिस्फुटाःसमुच्चयेनचे
ति।कार्यान्तराभावादेनासामपिपूर्ववत्स्वियोपलक्षणंतस्मात्तस्माएवना

च का इति वात्स्यायनो भिन्नत्वात्तृतीया प्रकृतिः पंचमीत्यन्ये। कार्यांतराभावा
दिति कन्यादिति षु च तत्सु सुखकार्यमुक्तं तद्व्यतिरिक्तानां विधवादीनां कार्या
भावात्। पूर्वस्यैवोपलक्षणमुपदर्शनं। तत्रैव यथासंभवमुपलक्षयेदि
त्यर्थः। तत्र विधवा प्रव्रजिता वान्यकारणवशात्परपरिग्रहे द्रष्टव्या। गणि
का दुहिता परिका च सुखकार्यत्वाद्वेश्यायां कुलयुवतिः पुत्रफलत्वफलत्वा
त्कन्यायां तृतीया प्रकृतिर्नपुंसकं स्त्रीत्वपुंस्त्व - वाद्भिद्यते। तत्र चोपरि
ष्टकर्मणि सुखलाभात्। नष्टपल्लवादिव्यापारेण पंचमीत्येके। अन्यथा सुख ५२
कार्यत्वात् वेश्याविशेष एवा नायकविमर्शमाह। एक एव तु सार्वलौकिको
नायकः प्रच्छन्नस्तु द्वितीयो विशेषलाभात् उत्तमाधममध्यमतां तु गुणागु

णतो विद्यात्। तात्तु उभयोरपि गुणागुणान्वैशिके वक्ष्यामः। तत्र नायकावद्दे
दात्स्नाभाव एक एव सर्वलौकिकः कन्यापुनर्भूवेश्यासु प्रवर्त्तमानत्सु सर्वलौ
किकः विदितः। स एव परपरिगृहीतासु सुखव्यतिरेकेण कार्यविशेषलाभा
त्पश्चाच्च प्रवर्त्तमानः प्रच्छन्नो द्वितीयः। गुणव्यवहारेण सत्त्रिविध इत्याह।
गुणागुणा इति। गुणसमुदायादुत्तमः। पादद्वयाभावान्मध्यमः। पादत्रया
भावादधमः। सर्वगुणाभावादनायक इति। उभयोरिति। नायकस्य नायि
कायाः कन्यादीनां विशेषानभिधानात्। पुनरगम्यतया विमर्शमाह।
अगम्यास्त्वेताः कुष्ठिन्युन्मत्ता पतिता भिन्नरहस्या प्रकाशप्रार्थिनी गतप्रा
ययौवना। अतिश्वेता अतिकृष्णा दुर्गंधा संबंधिनी सखी प्रव्रजिता संबंधि

सखिश्रोत्रियराजदाराश्च। स्वतंत्रा नायकस्य तु कन्या द्विविधा वा गम्यत्वं सूचयति
अशिष्टविशेषणार्थः। एवकारो — र्थः। सत्यपि कार्ये ष्टिता अगम्या इत्य
र्थः। कुष्ठिनी। तिजुगुप्सितत्वाः स्युपलक्षणार्थं उन्मत्ता यत्किंचन कारणेनि
सुख — हापतिता स्वजात्यपेक्षया महापातकाचरणात् तत्संपर्कात्पतितः
स्यात्। निरस्तरहस्या लोके रामं प्रकाशयन्ती — लज्जयन्ती। प्रकाशप्रार्थिनी प्र
कटनाटकमन्निक्षयं ती त्रपयन्ती अनर्थं च करोति। गतप्र — वनातसेवा
यां आयुः तेजश्च हीयते। अतिश्वेतेति अतिकृष्णा च। अप्रशस्तकन्यापुन ५३
र्नृश्विज्ञेया। अन्या अपि यथासंभवं योज्याः। दुर्गंधा गुह्ये वक्रे च दुष्टगंधा। सं
योगे वैमुख्यं जनयति। संबंधिनी भ्रातुरपत्यस्य भगिन्या वा परिणयसंबं

ध्येन न वा संबद्धा। सखी नाय्यवियस्या तदनुरोधात्। प्रव्रजिता कन्चिल्लासनेगृहीत
व्रता धर्मवैलोम्यात्। संबंधे सखिश्रोत्रियराजदाराश्चेति। विद्यासंबंधेन रा
जसंबंधेन वा संबद्धा संबंधिन स्तेषां दाराः आचार्याणां शिष्यभार्याद्व — यो
दृत्यादयोपि धर्मवैलोम्यात्। सखिदारा मित्रभार्या। अधर्मद्रोहादिभयात्।
तथा चोक्तं। रेतःसेकः स्वयोनिषु कुमारीष्वन्त्यजासु च। सख्युः पुत्रस्य च स्त्री
षु गुरुतल्पसमं विदुः। १। श्रोत्रियदाराः ब्रह्मदाराधर्मप्रत्याधर्मवैलोम्यात्। रा
जदाराश्च चतुराश्रमगुरुभार्या दृष्टादृष्टविरोधादित्येतदाचार्याणां मतम
नुक्तमपि ज्ञेयं। अत्र च यथोक्तव्यतिरेकेण परपरिगृहीताः सर्वा एवा
म्यास्युः इति। वात्स्यायनमतं अवस्था दृष्टं पंचपुरुषानागम्या काचिदस्तीति वा

वीयः। सूत्रं। स्वपतिव्यतिरेकेण दृष्टाः पंचपुरुषाः पतित्वेन यस्याः सा स्वैरिणी
चकारेण ब्रह्मा सर्वैरेव गम्या। तथा च पंचभिर्नाथवंधकीति पराशरः। एकस्या
दौ दृश्यन्ते तु सत्स्वपि कारणेष्वनैवेत्यर्थः। द्रौपदी तु युधिष्ठिरादीनां स्वपति
त्वादन्येषामगम्या। कथमेकस्यानेकपतिरिति चेत् लूह्णासिकाः प्रष्टव्याः। बा
भ्रवीया इति। बाभ्रवीयशिष्या बाभ्रवमतानुसारिण एवमाहुः। तत्रापि गो
णिकापुत्रो विशेषं वक्तव्यमित्याह। संबंधिसखिश्रोत्रियराजदारावर्ज
मिति। सूत्रं। गोणिकापुत्रः सहाध्यायी उक्तोपि उपकारसंबंधसमानशील ५४
वासनं त्यच्छास्परहा निवमभाणि च विंद्यात्। यस्यान्वधात्र्यपत्यं सहसंव
र्द्धितं पितामहविसंवादकमदृष्टवैकृतं वचस्यं। ध्रुवशोषमैत्र्या समपरिहा

रिर्यमिमंत्रविश्रावीति। मित्रसंपत्। रजकनापितमालाकारिकगांधिकतांबूलिक
सौरिकभिक्षुकपीठमर्दविटविदूषकादयो मित्राणि लघोषितमित्राश्च नागरि
कास्युरिति वात्स्यायनः। यदुभयोः साधारणमुभयत्रोदारं विशेषतो नायिका
याः सुविस्रब्धं मित्रसंपत्। तत्र दूतकर्मसु पटुता धृष्टतेंगिताकारज्ञता प्रतारणं
कार्येषु चाविषह्य यक्तुद्धिलं लघ्वी प्रतिपत्तिः सोपायता चेति दूतगुणान्वदंति
चात्र श्लोकः। आत्मवान्मित्रवान्युक्तो भावज्ञो देशकालवित्। अलभ्यामप्य
यत्नेन स्त्रियं संसाधयेन्नर -- बंधिसखिश्रोत्रियराजदारवर्जमिति
दृष्टपंचपुरुषानागम्येति वदन्ति। अयमभिप्रायः। संबंधिनायां स्वैरिण्य
पिवि- योनिसंबंधेनान्तरेण संबंधेन संबद्धत्वादगम्या संबंधिनश्च

बा०ह्य०ना०
५५

बाह्येनेतरगम्यैव। सखि-- यच्चस्यगम्या निनायकस्य सखीलक्षणायविय
स्यात्वतो मैत्रीव्यवहारस्याप्रस्तुतत्वान्मैरन्श्रोत्रियस्य क्रियावत्वात्तुरगत्रं च
त्तराश्रमगुरुत्वात् दाराःखं उत्तनीत्वाश्रयपि दृष्टादृष्टविरोधादगम्याः संहृ
यविमर्श। त्रिधा भेदतो गुणतो जातितश्च तत्राद्यमधिकृत्याह मित्रं
त्विष्टतीति मित्रं नवप्रकारं तत्र सहपांशुक्रीडितं एकत्यादन्तवासित्यत्वा
त्। स्निग्धं स्निह्यति। उपकारसंबंधं अर्थेन जीवितरक्षया चोपकृतत्वात् मैत्र्या व
र्तते। यच्चास्य नायकस्य कुमारिकायामेव यत्त्वहरस्सिन्नवा निबंधात्। तदु ५५
नयं मर्मगूढं रहस्यधरं च नायकप्रीतेरास्पदत्वात्। इति सख्यतौ। यस्य चोति।
यस्य नायको मर्माणि रहस्यानि च विंधात्। तदुनयं तस्मिन् सम्मानितस्नेह

त्वात प्रीत्या वर्त्तते। सहसंवृद्धं धात्रीको उनायकेन सहन्यस्तेयानादिना संबं
धं। धात्र्यपत्यं सहपांशुक्रीडितं तत्रापि प्रीत्यर्थं स्निह्यतीति प्रकर्षार्थे वचनयदे
कस्मिन्ग्रामे वा सहसंवृद्धं सहपांशुक्रीडितं दृष्टवानिति नवधा मित्रं गुण
तो विमर्शमाह। पितृपैतामहं पितृः पितामहादागतं पितृपैतामहं नायक
स्य तु प्रपितामहयथा तयोर्मैत्री तद्वत् पित्रोः पितामहयोश्च आसीदित्यवि
संवादकं। यथादृष्टश्रुताधिकारणं अदृष्टवेरुतं तत्तदात्मककार्यस्यादिमध्या
वसाने घटदृष्टवान् निचारं वर्त्तयथोक्तकारेणं ध्रुवं न त्यजति। अनोनन्त्रालं
नन्तरं संयाप्रवर्त्तते। अपरहार्यं न परैरपह्रियते। अनुकूलत्वात्। अमंत्रविभे
विगूढमंत्रं मित्रसंपत्। मित्रसंबंधात् मित्रगुणाधर्मिद्धारणोक्ताः। जाति

त्तो विमृश्यंते। रजकादयो नायकं स्वकर्मनिरूपकं कुर्वंति। परस्तु वनं च विशंति। त
त्र गांधिको गंधद्रव्यस्य विक्रेता गंधः पण्यमस्येति। तथा सौरिकः शौंडिकः। भि
क्षुकी निर्ग्रंथी स्त्रीलिंगः। तद्योपित् मित्राश्चेति। न तथा पुरुषा यथा योषितः। पुर
नवनं विशंति। विश्वासयंति चाल्पियः। दूतस्य यत्कर्म तत्कुर्यादित्याधारता
विमृश्यंते। यादृशि तिमित्रो उनयोरिति नायकस्य नायकायाश्च मैत्र्यावस्थमा
नत्वात्। साधारणं यथोक्तं मानिधत्रेउनयोत्रोदारमाप्तन्त्रत कार्यकोशलादि वि
शेष इति। नायकाया सुहृद्विस्रब्धविश्वस्तं तस्याः। साध्यमानत्वात्। तत्र मि ५६
त्रे दूतकर्मदृष्टतां क्रियासिद्धहेतुत्वात् नान्यत्रेति। तत्रापि यदि दूतस्य गुणाः स्यु
रतो गुणतोपि विमृश्यते। पटुताप्रज्ञानुविद्धया वाचा वक्तृत्वानुकन्त्रासनाधार्ष्ट्यं

प्रागल्भ्यमिति। इंगितं चित्तवृत्तिः। आकारं वदनं नयनादिगतो विकारः। तत्कृ
तया तदनुरूपमनुतिष्ठति। प्रतारणं कालज्ञता कालेस्मिन् प्रोसर्पितव्यि
ज्ञा वचन -- विषह्य युक्तिमिति संशयेषु विषह्य विमर्शं हि माधुर्यं स्ये
त्थि विश्रब्धभावप्रत्ययेन योज्यः। लघ्वी प्रतिपत्तिः --- वेति दूतगुणाः। का
र्यं विमृश्य तदेवोपायपूर्वकं अनुष्ठानं न कार्यातिपातनं इदानीम -- णार्था
नुष्ठाने बलं प्रयोजनं चाह। आत्मवानिति। तत्र त्रिवर्गप्रतिपत्त्या समुद्देशेन
चात्मन्याहितगुणत्वात्। आत्मवासाहाय विश्वोनिमित्रवान् युक्त इति नाग
रकवृत्तानुष्ठानेन युक्तः। स्वकर्मनिर्दिष्टः भावज्ञो नायकनायिकाविमर्शेन
तत्स्वरूपज्ञ इत्यर्थः। दूतकर्म चित्रपरिमर्शनेति फलं। अलभ्यामप्ययत्नेन

।स्त्रियं विपरिमर्शितां साधयत इति फलप्रयोजनं। एवं च नृतस्य दि स्त्रीसाधनयो
गत्वादिति। नायकसहायदूतीविपरिमर्शः पंचमं प्रकरणं पंचमश्चाध्यायः।
॥ ॥इति वात्स्यायनीयकामसूत्रटीकायां जयमंगलायां साधारणं प्रथम
मधिकरणं समाप्तं॥ ॥स्त्रियं सा — तदुक्तं स्त्रीसाधनं चावायः। सत्त्वावि
ज्ञातत्त्वात्स्यन युज्यत इति चावायात् प्राक् तंत्रं सांप्रयोगिकमुच्यते तत्रापि
संप्रयोगात् रतं तस्मिन्प्रमाणादिभिः ज्ञातस्वरूपे यथायथमालिंगना
दयः प्रयुज्यंत इति प्राक् प्रमाणकालभावेभ्यो रतावस्थापनमुच्यते। हेतौ ५७
पंचमी प्रमाणादिना रतस्य व्यवस्थापनमित्यर्थः। तत्र लिंगसंयोगाद्भा
वकालाविति ताभ्यामपि प्राक् प्रमाणेन रतावत्तरतावस्थापनमाह। श

शो वृषोऽश्व इति लिंगतो नायकविशेषाः। नायिकाः पुनर्मृगी वडवा हस्तिनी चेति
।सूत्रं। लिंगत इति। लिंग्यते स्त्रीत्वादयोऽनेनेति लिंगं लोकप्रतीत्या लिंगं
मेहनमुच्यते तत्रापि पोढं उन्नतं दैर्घ्यं प्रमाणं च शास्त्रव्यवहारतोऽप्या
त्। यो हीनः शश इव शशः तथा समात् वृषो महतोऽश्व इति नायकभेदाः नायिका
पुनरिति पुनः शब्दो विशेषणार्थः। लिंगस्य निम्नत्वात् संज्ञाभेदः प्रयुज्यंत
इति पूर्वाचार्यैर्मृग्यादिनिरूपमिताः शशादिनिरूपमितास्तथा चांगुलद्वेणां
षडष्टो द्वादशोत्सेधमायामेन यथाक्रमं। शशादिभेदभिन्नानां त्रिधा साधनसंस्थि
तिः। परिणाहेन तुल्यं स्यात् आयामस्य प्रमाणतः। नियतं नेत्रिके चेत्तु परि
णाहं प्रवक्षते। स्त्रीणां संसारमार्गेऽपि तद्वदेव प्रतिष्ठते। आयामपरिणाहौ

णोभ्यां मृग्यादीनां शशादिवदिति॥२॥ तत्र सदृशसंप्रयोगे समरतानि त्रीणि
।सूत्रं। तत्रेति। नायकनायिकयोर्निर्दिष्टसदृशो विसदृशो वा संप्रयोगः स्यादित्या
ह। सदृशसंप्रयोग इति। शशस्य मृग्या वृषस्य वडवया अश्वस्य हस्तिन्या
सह हस्तिन्या सह सदृशः संयोगः। इंद्रियसमाप्तिलक्षणोऽस्त्यादिभिर्लिंगसा
दृश्यात्। तस्मिन्सति त्रीणि समरतानि। रंध्रसाधनयोराश्रयाश्रयिभावे
न यंत्रसाम्यात्। विपर्ययेण विषमाणि षट्। विषमेष्वपि पुरुषाधिक्यं च
दनंतरसंप्रयोगे द्वे उच्चरते व्यवहितमेकमुच्चतररतं पुनर्द्वे नीचरते व्यव ५८
हितमेकमुच्चतररतं विपर्यये पुनर्द्वे नीचरते व्यवहितमेकं नीचतररतं च
तेषु समानि श्रेष्ठानि तरशब्दांकिते द्वे कनिष्ठे शेषा— —मध्यमानि। सूत्रं।
। विपर्ययेणेति। शशस्य वडवया सा हस्तिन्या च। वृषस्य मृग्या हस्तिन्या च। अ
श्वस्य मृग्या वडवया चेति विसदृशः संप्रयोगो लिंगवैषम्यात्। तस्मिन्सति
षड्विषमाणि रतानि। यंत्रवैषम्यात्। विषमेष्वपि तेषु व्यवहारार्थं विशेषसं
ज्ञामाह। पुरुषाधिक्यं चेति। यदा लिंगतः पुरुषस्याधिक्यं स्त्रिया न्यूनत्वं त
दानंतर्यो व्यवहितो वा संप्रयोगः स्यात्। तत्र अश्वस्य वडवया वृषस्य मृग्येति
। वैलोम्येनानंतरसंप्रयोगस्तस्मिन्समरतात्। द्वे उच्चरते। साधनस्योन्नया न्न
रंध्रमवपीड्य व्याप्रियमाणत्वात्। व्यवहितमिति। अश्वस्य मृग्या सह व्य
वहितसंप्रयोगो वडवाव्यवधानात्। तस्मिन्सति उच्चतररतं स्यात्। उच्चत
ररतं साधनस्यात्युच्चतया निःपीडितेन कथंचिद्व्यापारात्। विपर्यये पुन

रिति। पुनःशब्दो विशेषणार्थः। स्त्रिया आधिकालत्वं तत्र संप्रयोगे शशस्य व
यादृषस्य हस्तिन्येत्यानुलोम्येन समरतात्। हीनीचरते साधनस्य निकृष्ट
त्वयार्द्धं संप्रयोगे न वैपुर्यव्यवहारात्। व्यवहितेव रवयां नरिति प्रयोगे श
शस्य हस्तिन्यां सहेति नीचरते नीचतरते। तत्रानवैपुर्यैव व्यवहारात्। ए
षामुन्नमादीन्याह। तेषु त्रिनवसु रतेषु षड्भि विषरतेभ्यः समानि श्रेष्ठा
नि प्रशस्तानि। तत्र यंत्रसाम्यादुभयोः परस्परसुखातिशयात्। तदशाद्दां
किते कनिष्ठे उच्चरते द्वे नीचरते चरशाद्दांकिते अधमे तत्र यंत्रस्यातिपीडना ५९
दति रोधि रध्यान्वस्य परसुखस्याभावात्। शेषाणि चत्वारि उच्चरते द्वे नीच
रते द्वे मध्यमानि। श्रेष्ठकनिष्ठत्वाभावात्। तत्राद्यन्तपीडनादनतिशेति

त्यान्वस्य परसुखस्य समत्वात्। तत्रापि मध्यमानां विशेषमाह। साम्येप्युच्चांकनी
चांकात् ज्यायः। इति प्रमाणतो नव रतानि। सूत्रं ज्येष्ठकनिष्ठाभावाद् तस्य साम्ये
पि मध्यस्थेपीत्यर्थः। उच्चांकं नीचांकात् ज्याय इति। उच्चरते हि योषित उत्कुष्टका
दिना प्रसार्यजघनं संविष्टायाः साधनाधिक्यात् कंडूतिप्रतीकारोधिकः। नानी
चरते तु संपुटकादिना अवबद्धासितजघनायाश्छेपिन तत्प्रतीकारोस्ति। यथो
क्तं। न लक्ष्यसाधनः कामी चिररक्त्योपि वानरः। कंडूतेरप्रतीकारान्नातिस्त्रीप्रि
य उच्यते। १। इत्युक्तमेवेति। भावतोपि रतावस्थापनमाह। यस्य संप्रयोग
काले प्रीतिरुदासीना वीर्यमल्पं क्षतानि च न सहते स मंदवेगः। सूत्रं। भावतो
हि कालस्य पश्चाद्भाविनात् फलरूपस्याभावात्। तस्यापरिच्छेदात्। तथा

ष्टिहेतुफलभेदात्। अत्र द्विविधो भावः। तत्र कामिता खेदहेतुस्तस्मिन्सति संप्र
योगात् रतान्ते च भावः फलं तस्मादुभयरूपात् रतमवस्थाप्यते। स च मृदु
मध्यातिमात्रभेदात्त्रिविधः। तत्र यस्य संप्रयोगकाले प्रीतिरुदासीना सं
प्रयोगेच्छा मनाग्भवति रतिर्वीर्यमल्पं संप्रयोगे मंदो व्यापारः। शुक्रधातु
र्वल्लीकः। क्षतानि च नायिकया दंतनखैः प्रयुज्यमानान्युपलक्षणत्वात्प्र
हरणं च न सहते य इत्यर्थः। छिनक्रिरि परिणामः। मृदुभावत्वान्मंदवेगो मृ
दुराग इत्यर्थः। तद्विपर्ययौ मध्यमचंडवेगौ भवतः। तथा नायिकापि। सू ६०
त्रं। यथोक्तस्य विपर्ययो यस्य संप्रयोगे प्रीतिर्मध्या वीर्यं मध्यं क्षतानि च
यः सहते स मध्यभावत्वात्। मध्यवेग इत्येको विपर्ययः। संयोगे प्रीतिर

धिका वीर्यमल्पं क्षतानि चात्यर्थं सहते सोऽधिकभावत्वाच्चंडवेग इति द्विती
यः। तथेति पुरुषवत्। यस्य संप्रयोग इत्यादिना मंदमध्यचंडवेगा इति ना
यिकाभिसंबन्धः। तत्रापि प्रमाणवदेव नवरतानि। सूत्रं। भावेऽपि प्रमाणवदेते
-- इति संप्रयोगे समरतानि त्रीणि विपर्यये विषमाणि षट्। तद्वत्क
लतोऽपि शीघ्रमध्यचिरकालनायक -- भावप्रमाणाभ्यां तथा कालतो नव
रतानि भावोत्पत्तिनिमित्तस्य कालस्य शीघ्रादिभेदेन त्रैविध्यात्। यदाह
शीघ्रमध्यचिरकाला इति। शीघ्रेण कालेन रतिर्यस्य तथा मध्यचिरका
लाभ्यां नायका इति। नायकश्च नायका चेति पुमान्स्त्रिया इत्येकशेषनि
र्देशः। तत्र स्त्रियां विवादो न स्त्रीपुरुषतद्भावमधिवागच्छति। सूत्रं। तत्रेति

नायिकानायकयोः स्त्रीपुंसयोः स्त्रियां विवादः स्त्रीविषये मतभेद इत्यर्थः। तत्रौ
द्दालकेर्मतं। न स्त्री नायकपुरुषवद्भावमधिगच्छतीति यादृशं सुखं विसृष्टिप्रभवं
पुरुषोऽनुभवति। तादृशमेव न स्त्री शुक्राभावात्। किमर्थं तर्हि पुरुषेण संप्र
युज्यत इत्याह सा तत्वात् तस्याः पुरुषेण कंडूतिरपनुद्यते। सूत्रं। संवादकस्यास्व
भावतः कृमिजुष्टत्वात् तत्र निसर्गसिद्धा कंडूतिः। तथा चोक्तं। रक्तजाः कृमयः
सूक्ष्माः मृदुमध्याधिशक्तयः। स्मरसद्मसु कंडूतिं जनयंति यथाबलमिति सा त
स्याः पुरुषेणापनीयते। सा तत्वादिति। अनवरतस्य धनव्यापारेणेत्यर्थः। अन्य ६१
था तत्प्रतिबंधे कंडूत्युत्कोप एव स्यात्। अपद्रव्येणापि स्वयमपनयतीति वेदा
त्। सा पुनराभिमानिकेन सुखेन संसृष्टा रसांतरं जनयति तस्मिन् सुखबुद्धिरस्याः

पुरुषप्रतीतिश्चाभिमानिकत्वात् कथं ते सुखमिति प्रष्टुमशक्यत्वात् कथमेतदुपल
भ्यत इति चेत् पुरुषो हि रतिमधिगम्य स्वेच्छया विरमति न स्त्रियमपेक्षते न
त्वेवं स्त्रीत्यौद्दालकिः। सूत्रं। सा च कंडूतिरपनीयमाना पत्रक्षारितिकया कर्णकं
डूतिरिव आभिमानिकेनेति। आभिमानिकं चुंबनादिसुखं वक्ष्यति तेन संसृष्टा
अनुगता रसांतरमिति सुखांतरं जनयति। यत् कंडूतिप्रतीकारमात्रं तु न सु
खबुद्धिः तस्या अप्राधान्यात् षष्ठतः स्वतंत्रविशेषयाभिमानसुखानुविद्धा
पुरुषवत्यर्थप्रतीतिः प्राधान्यादित्येतद्विशेषलक्षणं अस्यां विशेषो यदत्र
न पुरुषवत् शुक्राभावात्। तत्र रसांतरं मारंभात् प्रभृति संतानेन सर्वथा कं
डूत्यपनोदात् प्रवर्तनेन पुरुषसुखं तु विसृष्टिनावितत्वादत एव तयोः स

रूपतः कालतश्च न सादृश्यमिति न कालभावाभ्यां न रतानि। ननु पुरुषवद्रति
स्त्री नाधिगच्छतीति कथमेतदुपलभ्यते। यस्मात्पुरुषप्रतीतेश्चेतोधर्मत्वेना
तींद्रियायाः प्रत्यक्षेणानभिहितत्वात् स्त्रियाश्च रागात् स्त्रीप्रीतेश्चानभिहितत्वात्स्त्रि
त्पुरुषस्य यदा स्त्री पुरुषायमाणा स्वव्यापारेणात्मनः प्रीतिं जनयति। तत
श्च तदसंवेदनादेव स्वभावात् प्रीतिरस्या इति कथमुपलभ्यते। दृष्टान्तोऽस्यती
त्यपि नास्तीत्याह। कथमिति। कथं केन प्रकारेण तव सुरतं किं विसृष्ट्या यथा
स्माकं किं किंचान्येनेति। तत्रास्त्रिया विसृष्टिसुखस्यासंवेदनात्। प्रकारांतः ६२
सुखस्य च पुरुषेण संवेदनात् प्रष्टुमपि न शक्यते किमुत तद्वचनादप
रिज्ञानं तस्मात्पुरुषवद्भावं नाधिगच्छतीति कथमेतदुपलभ्यत इत्या।

शंक्योद्दालकिरुपलब्ध्युपायमाह पुरुषो हीति। रतिमधिगम्य विसृष्टिसुख
मनुभूय कृतकृत्यत्वात् स्वेच्छया तद्व्यापाराद्विरमति। न स्त्रियमपेक्षते व्या
प्रियमाणामपि न त्वेवं स्त्रीति सापि यत्पुरुषवद्विसृष्टिसुखमधिगच्छेद्यत्
दा तदधिगम्य पुरुषनिरपेक्षा स्वेच्छया यंत्रविश्लेषपूर्वकं विरमेत्। न चैव
मन्यत्र पुरुषविरामात्। विरतेऽपि पुंसि पुरुषांतरसापेक्षत्वात्। तथा हि।
केनचित्पुंसा संप्रयुज्य तथा वाञ्छितैरेवापरैः संप्रयुज्यमाना काचिद्दृश्यते
। एवं कृतोक्तं। अग्निस्तृप्यति काष्ठैर्नोनापगाभिः पयोदधिः। नांतकः सर्वभू
तेषु न पुंभिर्वामलोचनेति॥१॥ तस्मात्स्वेच्छया विरामाभावान्न विसृष्टिसु
खाधिगमो यथा प्राक् विसृष्टेः पुरुषस्येति। तत्रैतत्स्यात् चिरवेगे नायके

।स्त्रियोनुरज्यंते।शीघ्रवेगस्यभावमनासाद्यावसाने।भ्यसूयिन्योभवंति।तत्स
र्वंभावप्राप्तेश्चलक्षणमिति।सूत्रं।मान्द्यात्स्वेच्छया।विराममनुपलंभात्स्त्रीपुं
।विसृष्टिसुखानुमतिःअनुरागदर्शनात्तुस्यात्।तद्यथा।चिरवेगेनायके।चि
रमुपसृप्य।विसृष्टिसुखाधिगमात्।विरते।भिध्यंतीत्यर्थः।शीघ्रवेगस्यचना
यकस्यमुपसृत्यसुखाधिगमात्।विरतस्यरतांतेभ्यसूयिन्योद्वेषिण्योभवं
।ति।तत्सर्वमित्यनुरागोविरागश्चोभयंलक्षणंज्ञापकमित्यर्थः।कस्येत्याह।
भावस्यप्राप्तेरप्राप्तेश्चेति।तत्रानुरागोयोषितांसुखप्राप्तिंज्ञापयति।विरा ६३
गश्चदुःखाधिगमात्दुःखाप्राप्तिं।विरागस्यविरुद्धकार्यत्वात्।अनुरागवि
रागौचसुखदुःखत्वेतुकौपुरुषेषुदृष्टांतत्वेनसिद्धौ।तेपिहिपुरुषा।यि

तो।निरवाद्यत्य।विरतायांयोषित्य।निभतसुखा।चिरवेगात्अनुरज्यंते।लक्षण
विरतायांचदुःखाधिगमात्भावाप्यइतिसुखं।विरज्यंते।तस्मात्पुरुषस्येवयोषितो
प्यनुरागोपलंभात्।विसृष्टिसुखाधिगमःप्रतीयतइति।तच्चनकंडूतिप्रतीका
रोपिहिदीर्घकालंप्रियइतिएतदुपपद्यतएवतस्मात्संदिग्धत्वादलक्षणमि
ति।सूत्रं।तच्चनेत्यनुरागोभावप्राप्ते।र्लिंगमित्येतन्ना।स्तिसाधारणत्वादस्य
।यदाह।कंडूतिप्रतीकारोपिहीति।तस्माच्चिरवेगनकंडूतिर्यःप्रतीकारःप्र
तिक्रियादीर्घकालइति।अतिचिरकालःसोपिस्त्रीणांप्रियः।नकेवलंवि
सृष्टिसुखजननमेतदुपपद्यतएवनत्वनोपपद्यतइत्यनेनायोगव्यवच्छे
देनभवत्यलक्षणमेतदस्तीतिदर्शयति।अन्यथाविसृष्टिसुखाधिगमेपि

कंडूतेरप्रतीकारात् न तत्रानुरागः । ततश्च किं विसृष्टिसुखाधिगमात् अनु
रागोऽस्याः किं वा कंडूतिप्रतीकारसमुत्थ इति संदिग्धः तथानधिगमात् तस्मा
देतदुभयं संदिग्धत्वाद् विसृष्टिसुखस्य प्राप्ते — — स्वाभ्युद्धरणमज्ञापकं
उभयत्र वर्त्तमानत्वात् । तस्मात् स्वेच्छया विरामाविरामावेव ज्ञापकौ तौ
च — — यावद्वर्त्तमानोऽस्त इति न पुरुषवद् इतिमधिगच्छतीति स्थितं । एतदेव
मतमौद्दालकिर्गीतेन श्लोकेनाह । तत्र श्लोकः । संयोगे योषितः पुंसां कंडू
तिरपनुद्यते अभिमानसंसृष्टा सुखमित्यभिधीयते । सूत्रं । तत्र त्वपनो ६४
दसमुत्थं स्पर्शसुखं अभिमानसंसृष्टेति कारणे कार्योपचारात् अभिमा
निकसुखानुविद्धं सुखमित्यभिधीयते योषितः । क — — भ्रमतमाह । स

तत्या युवतिरारंभात् प्रभृति भावमभिगच्छति पुरुषः पुनरंत एव तदुपपन्नत
रकं नह्यसत्यां भावप्राप्तौ गर्भसंभव इति बाभ्रवीयाः । सूत्रं । द्वावपि विसृष्टिसु
खमधिगच्छतः । स्त्री त्वारंभात् यत्र योगात् प्रभृति सा तत्पारंतवेगेन सा हि पु
रुषेणेव स्पृष्यमाणाभिजलसन्तानवत्सततैः क्लिन्नसंबाधा भवतीति प्रत्य
क्षसिद्धमेतत् । सुखं पुरुषस्येव विसृष्ट्यनुविद्धमित्यारंभात् प्रभृति भावमधि
गच्छति पुरुषः पुनरन्ते भावमधिगच्छति । तदा मी शुक्रविसर्गात् एतदिति य
थोक्तमुपपन्नतरकं प्रमाणसिद्धत्वात् ततश्च तयोर्भिन्नकालत्वात् न सादृश्य
मिति न कालतोऽनवरतानि भावतस्तु संति । विसृष्टिसुखसादृश्यात् तान्तु सं
बाधोद्रणस्वभावत्वात् उपनुद्यमानः क्लिद्यतीत्याह । नहीति । रसप्राप्तौ वि

सृष्टिसुखाधिगमेऽस्मात्। हि स्त्री गर्भं धत्ते। यथाह। वरकः कारः। निद्रा विकारगौरव
मंगसादः तंद्रा प्रहर्षो हृदयव्यथा च। तृप्तिश्च बीजग्रहणं स्त्रियो गर्भस्य
सद्योनुगतस्य लिंगमिति। तस्मिंस्तु भावः स च न शुक्रविसृष्टिं विनेत्यभिधाय
आन्तर्वं विसृजति न शुक्रमिति केचित्। यदाह। कामाग्नितप्तचित्तस्त्रीपुंसंयु
(दुनादृनतिक्रोति स्यात् तस्य शुक्रसुखस्य समत्वात्। तत्रापि मध्यमानां विशेष
(माह। साम्येपि उच्चां कं नीचां कां तज्ज्यायः। इति प्रमाणतोऽनवरतानि। सूत्रं ज्ये)
(ष्ठकनिष्ठाभावादृतस्य साम्येपि मध्यस्थेपीत्यर्थः। उच्चां कं नीचां कालज्याय) ६५
(इति। उच्चरते। हियो। वित्तउत्फुल्लकादिना प्रसायजिघनं संविष्टाया साधन)
(।धिक्यादकं इति प्रतीकारो धिक्। सा मनः। नीचरते तु संपुटकादिना अवज्ञा।सि)

तजघनायाश्चापि न तत्खलीकारोऽस्ति। यथोक्तं। न्योन्यदेहसंसर्गात् अरलीदृढा स्वामि
व वह्निः शुक्रान्तर्विमथनादिति। आस्ति तावत् तृप्तिनिबंधनं। कितदिति चिंत्यते य
दि तत् शुक्रं कथं योषितो गर्भसंभव उत्पद्यते। यथाहि। पुरुषसंसर्गात् स्त्री गर्भं
धत्ते तथा योषित्संप्रयोगादपि। यथोक्तं सुश्रुते। यदा नारी च नारी च मैथुनायो
पपद्यते। अन्योन्यं मुंचतः शुक्रमनस्थिस्तत्र जायते। तस्माद्रसधातोरुत्पन्नो
स शुक्रधातुरेव कस्यांचिदवस्थायां आन्तर्वा शुक्रधातुस्तु मन्नधातोरुत्पद्यत इति
। अत्रापि तावेव आशंकापरिहारो भूय। सूत्रं। बाभ्रवमतेपि तावेवेति। एवो
क्ता वाशंकापरिहारौ वाच्यौ। तत्र यद्यारंभात्प्रभृति भावाधिगमस्तदा विर
वेगेऽनुरज्यंते। शीघ्रवेगस्य चावसानात्पस्य योनिरित्ययं न दोषो न युज्यते। त

त्राप्यासां भावाधिगमात् दृश्यते च भेदः। यस्मादनुरागस्तस्मादंते पुरुषवद्भावस्य
प्राप्तिः। यतः सा सूयात तस्मात्प्रारंभात्प्रभृतीत्याशंका। परिहारोपि तत्राकंडूति
प्रतीकारोपि दीर्घकालः प्रियइति। कंडूत्यपनोदाभावाच्च शीघ्रवेगे च प्रद्वेषं
सत्यपि भावाधिगमे कंडूत्यपनोदस्याधिकक्षाभस्याभावात्। अथवा दीर्घ
कालं भावजननमपि प्रियमिति योज्यं। भावस्याधिगतत्वात् शीघ्रवेगेप्य वि
रज्यंते चिरकालं भावस्याजननात्। योषितो हि चिरानुबंधनं भावमुत्पाद्य
मानमिच्छंति तासामद्विगुणकामत्वात्। नैपुनै विंसैष्टि एवं सति न पुं निर्वा ६६
मक्षोचनास्वथ्यंतीतियुक्तं। तेषामेकगुणकामत्वात्। न पुनर्विसृष्टि सुखाभा
वादिति। न्त्वयश्चेति। पुनराशंकापरिहारो। यदाह। तत्रैतस्या सततेन रस

प्रासावारंभकाले मध्यस्थचित्तता नातिसहिष्णुता च ततः क्रमेणाधिको राग
योगशरीरेपि निरपेक्षत्वं अंते धातुक्षयात्। विरामाभीप्सेत्येतदुपपन्नमि
ति। सूत्रं। रतस्यारंभकाले मध्यस्थचित्तता नखदंतादीनामप्रयोगो नातिस
हिष्णुता च। नखदंतादीनीप्रयुज्यमानानां नातिरूमिता ततः चक्रमेणारंभा
दुत्तरकालं तरतमभेदादधिको रागयोग इति मध्यस्थचित्ततायां विपर्ययः
शरीरेपि च निरपेक्षत्वमित्यतिसहिष्णुतायां अंते च विरामाभीप्सा प्रयोग
निवृत्तीच्छा एतत्सर्वमवस्थांतरं योषितः सातत्वाद् सप्राप्तौ सत्यामनुपपन्नं
प्रारंभात्प्रभृति एकरूपतया सातत्येन विसृष्टि सुखस्य प्रवृत्तत्वात्। न हि
पुरुषस्य विसृष्ट्यवस्थायामेतदवस्थांतरं योषिद् दृश्यत इति। तत्र मनसा

मान्येपि भ्रांतिसंस्कारे कुलालचक्रस्य भ्रमरस्य वा भ्रांतावेव वर्त्तमानस्य प्रारंभे
मंदवेगता ततश्च क्रमेण वेगस्येत्युपपद्यते धातुक्षयाच्च विरामाभीप्सेति त
स्मादनाद्येयं सूत्रं नैवानुपपन्नं कुलालचक्रादिवदुपपद्यत एवात्र भ्रमरकं
काष्ठमयं क्रीडनकद्रव्यं यद्दीर्घेण सूत्रेण वेष्ट्यक्षा। उत्का भ्रमयंति। यथैत
योर्दृढसूत्रप्रत्याहितयोर्भ्रांतिसंस्कारे समानेप्यादिमध्यावसानेषु भ्रांत्या
मेव वर्त्तमानयोरन्यथा भ्रांत्यभावात् तत्संस्कारोस्तीति कथं प्रतीयते। प्रारंभे
मंदवेगता मंदभ्रमणं। ततः क्रमेण तरतमभेदेनापूरणं वेगस्य यथात ६७
त्कुलालचक्रं भ्रमरकं वा निश्चलतरमिव लक्षितमिति। एवं योषितोपि पुरुषे
णोपसृष्टादिभिः प्रत्ययैः क्रियमाणे विसृष्टिसुखे समानेप्यादिमध्याव

सानेषु प्रारंभकाले मंदवेगता मंदा रतिः तत्रैव मध्ये रसाचित्तता नातिस
हिष्णुता च ततः क्रमेणापूरणं वेगस्याधिक्यं रतेः। यत्राधिकष्टत्वं तत्
यस्मा शरीरनिरपेक्षत्वमिति। सा तत्त्वेन भावस्य प्रवृत्तत्वात् कथं विरामाभी
प्सेत्याह। धातुक्षयाच्चेति। समुत्पन्नकामितास्येन भावेयः शुक्रधातुः स्वस्था
नाच्च्युतः स्वनाडीं प्रतिपद्यते तस्यारंभात्प्रच्युतिस्थाने २ स्यंदनात् क्षये नि
वृत्तरागत्वात् विरामाभीप्सा तत्स्मादनापेक्षा इत्यर्थः। विसृष्टिप्रभवस्य भा
वस्य संतानेन प्रवृत्तस्यावस्थांतरमनुपपन्नमिति निरस्तं चक्रभ्रमरकवदु
पपत्तेर्न्नस्त्विमेवार्थं बाभ्रव्यगीतेन श्लोकेनाह। सुरतांते सुखं पुंसां स्त्रीणां
तु सततं सुखं धातुक्षयनिमित्ता च विरामे सोपजायते॥१॥ एवं पक्षद्वय

मान्येपिभ्रांतिसंस्कारेकुलालचक्रस्यभ्रमरस्यवाभ्रांतावेववर्त्तमानस्यप्रारंभे
मंदवेगतातत्तश्चक्रमेणैमवेगस्येत्युपपद्यतेधातुक्षयाच्चविरामाभीप्सेतित
स्मादनादेयासूत्रं।नैवानुपपन्नं।कुलालचक्रादिवदुपपद्यतएव।भ्रमरकं
काष्ठमयंक्रीडनकद्रव्यंयद्दीर्घेणसूत्रेणवेष्टयित्वाडिकाभ्रमयंतीयथौत
योरंडसूत्रप्रत्याक्षिप्तोवभ्रांतिसंस्कारेसमानेप्यादिमध्यावसानेषुभ्रांत्या
मेववर्त्तमानयोरन्यथाभ्रांत्यभावात्तत्संस्कारोऽस्तीतिकथंप्रतीयते।प्रारंभे
मंदवेगतामंदभ्रमणं।ततःक्रमेणतरतमभेदेनआपूरणंवेगस्ययथात ६७
लुलालचक्रंभ्रमरकंवा।निश्चलतरमिवलक्षितमिति।एवंयोषितोपिपुरुषे
णोपसृष्टादिभिःप्रत्ययैरुत्पद्यमानेविसृष्टिसुखेसमानेप्यादिमध्याव

सानेषुप्रारंभकालेमंदवेगतामंदारतिःतत्रैमध्यरूढचित्ततानातिस
हिष्णुताचततःक्रमेणआपूरणंवेगस्याधिकारतेः।यत्राधिकरूढत्वात्
यस्याःशरीरनिरपेक्षत्वमिति।सातत्येनभावस्यप्रवृत्तत्वात्कथंविरामाभी
प्सेत्याह।धातुक्षयाच्चेति।समुत्पन्नेकामितास्येभावेयःशुक्रधातुःस्वस्था
नाच्युतःस्वनाडीप्रतिपद्यतेतस्यारंभात्प्रच्युतिस्थानैः२स्यंदनात्क्षयेनि
वृत्तरागत्वात्विरामाभीप्सात्स्मादनापेक्ष इत्यचोद्यं।विसृष्टिप्रभवस्यभा
वस्यसंतानेनप्रवृत्तस्यावस्थांतरमनुपपन्नमितिनिरस्तंचक्रभ्रमरकवदु
पपत्तेरमुमेवार्थंवाभ्रव्यगीतेनश्लोकेनाह।सुरतांतेसुखंपुंसांस्त्रीणां
तुसततंसुखंयावत्तयानिमित्ताच्चविरामेसोपजायते॥१॥एवंपत्तइय

मुपन्यस्य सिद्धांतमाह। तस्मात्पुरुषवदेव योषितोपि रसव्यक्तिर्द्रष्टव्या॥सूत्रं॥
यत एवं विवादः तस्माद्रसव्यक्तिः रत्युत्पत्तिर्यथा पुरुषस्य विसृष्टिरंते च तद्व
देव योषितोपि द्रष्टव्या। पुरुषसुखेन हि स्त्रीसुखस्य वैसादृश्यं स्वरूपतः दिका
तोवा स्यादित्याह। स्यपति। कथं हि समानायामेवाकृतावेकार्थाभिपन्नयोः का
र्यवैलक्षण्यं स्यादुपायवैलक्षण्यादभिमानवैलक्षण्याच्च। कथमुपायवैलक्ष
ण्यं च सर्गात् किं तर्हि पुरुषोऽधिकरणं युवतिरन्यथा कर्ता क्रियां प्रतिपद्यतेऽन्यथा
चाधारस्तस्मान्नोपायवैलक्षण्यादभिमानवैलक्षण्यमभियोक्ताहमिति पुमान ६७
नियुक्ताहमनेनेति युवतिरिति वात्स्यायनः।सूत्रं। कथं हीति तत्र विजातीय
योः पुरुषवडवयोर्न वैसुखं विजातीयं कार्यस्य सुखस्य स्वरूपतः कालतश्च

भेदादित्यर्थः। ये च समानजातयः संतः एकार्थाभिपन्नास्तेषां सदृशं कार्यं न हि
मेषयोः समानाकृत्योरेकस्मिन्युद्धलक्षणेऽर्थे प्रवृत्तयोरभिघातः कार्यकाल
स्वरूपाभ्यां भिद्यत इति पुनः पुनः शास्त्रकार एव परपक्षमपोहन्नाह। स्यादुपा
यवैलक्षण्यादिति। भवेत्तत्र कार्यभेदः उपायभेदात् उपायभेदात्कथमुपायवै
लक्षण्यं। वसर्गादि। कर्ता हि पुरुषोऽधिकरणं युवतिः अन्यथा हि कर्ता क्रि
यां प्रतिपद्यते। अन्यथान्येचारस्तस्मान्नोपायवैलक्षण्यात्सर्गादभिमानवै
लक्षण्यमपि भवति। अभियोक्ताहमिति पुरुषोऽरज्यते। अभियुक्ताहमने
नेति युवतिरिति वात्स्यायनः। कथमिति स चोपायभेदो निरूप्यमाणः स्त्री
पुंसव्यापारव्यतिरेकेण नास्तीत्याह। उपायवैलक्षण्यं वसर्गादिति उपाय

वा॰कु॰मा॰

नेदः सृष्टिरित्यर्थः। एषैवातिसृष्टिः स्त्रीपुंसयोर्यदेकः कर्त्तान्यश्चाधार इति। तदेव
योजयन्नाह। अन्यथेति। एकस्य निर्भ्रमेहनमपरस्योन्नतं। ततश्च ग्रासकृता
वातमेहनयोः क्रिया नेदः। स्वयमुत्थापितं पराङ्गान्तरं दुःखमिति तत्रेतस्यादुपा
यवैलक्षण्यवदेवाहि कार्यवैलक्षण्यमिति पि। कस्मान्नस्यादिति तत्राह नहे
तुमदुपायवैलक्षण्यं तत्र कर्त्राधारयोर्भिन्नत्वादहेतुमत्कार्यवैलक्षण्यम
न्याय्यं स्यादाकृतेरभेदादिति। सूत्रे। तत्रेतादिति। उपायवैलक्षण्यं निबंध
नं कार्यवैलक्षण्यं यत्त्वदुक्तं तदेतन्नुस्यान्नरचनहेत्वित्यनेन वक्ष्यमाणम ६८
दुक्तं कस्मान्नस्यादित्यन्वयः। तत्रेति। नसंगतित्वमुपायवैजात्यं नहेतुमत्
नकारणतावच्छिन्नं कार्यवैलक्षण्येऽप्रयोजकमित्यर्थः। तत्र एवं निद्रि

सति कर्त्राधारयोर्भिन्नलक्षणत्वात् कार्यवैजात्योपभोगिसुरूपादतिरिक्तस्व
रूपत्वादप्रयोजकत्वादितियावत्। अहेतुमत् अप्रयोजककारणकं कार्यवैजा
त्यं अन्याय्यं अनुपपत्तिकमित्यर्थः। ननूपायवैलक्षण्यं कथमप्रयोजकमत
आह। आकृतेरिति। सुखव्यक्तेः साजातीयत्वादित्यर्थः। तथा च कार्येण कारणानु
मानादुपायनिष्ठं वैजात्यं सुखवैजात्येऽप्रयोजकमिति भावः। तथा चोक्तं पु
रादयनाचार्यैरारोपे सति निमित्तानुसरणं नतु निमित्तमस्तीत्यारोप इति।
पुनरपि सुखवैजात्यमुद्भावयन्नाह। तत्रेतस्मात्संहत्याकारकैरेकोऽर्थोऽभि
निवर्त्यत इति पृथक् परस्परस्वार्थसाध॰कैः पुनर्भिन्नोत्पद्यत इत्युक्तमिति। सू
त्रे। तत्रेति। संहत्या समूहेन मिलितैरितियावत्। यथा तंदुलेध्यनपानीय

स्थाल्यादिसंपादकैः संभूय एकोर्थो निष्पाद्यते ओदनरूपस्तत्रौदनमात्रसाधक
त्वं सर्वेषामित्येकस्वार्थसाधकत्वात्प्रकृते त्वत्राधारो युवतिः पुरुषव्यापारैर
सापेक्षा स्वसती स्वयमपि चुंबनालिंगनयंत्रयोजनादिनिजव्यापारैः स्वार्थं सा
धयति पुरुषश्चैवं कर्त्रा स्त्रीव्यापारापेक्ष इति। एतच्च भिन्नार्थसाधकत्वं का
रकाणामयुक्तमोदनादावदृष्टत्वाद् दृश्यते च स्त्रीपुंसयोः स्तत्र भिन्नार्थसा
धकत्वमपि कारकाणां यथा स्त्रीपुंसयोः कर्त्राधारयोः सुखरूपं पृथक् पृथ
क्कार्यं तथा सप्तानां स्थितित्वमपि। तदेव कार्यं किंलक्षणरूपाभ्यां विसदृशं स्या ६९
दित्यभिप्रायः। तच्च न युगपदनेककार्यसिद्धेरपि दृश्यते यथा मेषयोरभि
घाते कपित्थयोर्भेदे भक्ष्ययोर्युद्ध इति न तत्र कारकभेद इति चेदिहापि

न वस्तुभेदस्तु उपायभेदेन तच्चेत्युच्यतां पुरुषस्त्रीणामुभयोरपि सदृशी सुखप्रतिपत्ति
रिति। सत्यं। तच्च नेति। नैतद्युक्तं किं त्वयुक्तमेव। युगपदनेककार्यसिद्धिदर्श
नात् यथा मेषयोरभिघात इति अभिघातविषये युगपदनेककार्यसिद्धिर्द
श्यते युगपल्लब्धिधान्यभिघातो भवतीत्यर्थः। एवं कपित्थयोर्भेदे भक्ष्ययोश्च
बाहुयुद्ध इति। तथा स्त्रीपुंसयोः कारकयोः पृथक्कार्यं सदृशं च स्यादिति मेष
कपित्थभक्ष्यग्रहणं तिर्यगचेतनमनुष्येषु पक्षस्यैतस्य व्याप्तस्य प्राप्तिख्याप
नार्थं। न तत्र कारकभेद इति चेदिति। मेषादिषु द्वन्द्वप्रतियोगिनो कर्त्तारो
न तत्र कारकांतरभिदस्तु कर्त्राधाराविति। कथं किं सदृशं रागमित्याख्यातं इ
हापीति। स्त्रीपुंसयोरपि न कश्चित्परमार्थतः कारकयोर्भेदः अपि तु द्वावप्य

तो कर्त्तरि क्रियां निवर्त्तयंतो केवलं करणाधिकरणादयो भेदाद्बुद्धिकल्पिता व्य
वहारार्थं व्यवस्थाप्यंते। एवं च सत्युपायवैलक्षण्यं च सर्गादिति। यदुक्तं तद
भिहितं प्रतिविहितं पुरस्तादित्यर्थं द्रष्टव्यं। कर्त्राधारलक्षणस्यैवाचालत्ववला
द्। तेन प्रतिविहितेनोनयोरपि स्त्रीपुंसयोः सदृशी सुखप्रसिद्धिः कालस्व
रूपाभ्यां सदृशं सुखमुत्पद्यत इत्यर्थः। अन्यथा कथं तयोः रागद्वेषयोरुपशमः।
तामेवार्थ्यं तिक्तीमानंदावस्थामधिकृत्योपस्थेंद्रियमानंदेंद्रियमितिगीयते।
अमुमेवार्थं शास्त्रकारः संग्रहश्लोकेनाह। श्लोकः। जातेरभेदाद्दंपत्योः सदृशं सु ७०
खमिष्यते। तस्मात्तथोपचर्या स्त्री यथाग्रे प्राप्नुयाद्रतिं।१। सदृशात्वस्य सिद्ध
त्वात् कालयोगीन्यपि भावतोपि कालतः प्रमाणवदेव नवरतानि। सूत्रं।

दंपत्योः स्त्रीपुंसयोरेकार्थाभिनिपन्नयोरित्यर्थः। एतावत्तु स्यादवांतरस्त्रीजा
तिभेदात्परपरमस्याः कंडूत्यपनोदनात्सुखं। यच्चोपसृद्यमाने संबाधे स्पंदनं
शुक्रस्य विसृष्टे सुखं तु पुरुषवदंत एवेति। यथा चोक्तं। कंडूत्यपगमात्स्त्रीणां स्म
रणाच्च सुखं द्विधा स्पंदनं च विसृष्टेश्च शुक्रस्य स्मरणं द्विधा। कीर्तितां केवलस्पंदा
द्विसृष्टेर्मूर्च्छनासुखं। अंते त्वाक्षिप्तवेगाया विसृष्टिर्नखलक्ष्यतेति। तत्र सदृशा
दंपत्योः समकालावेव वृत्तिरुत्तमः परुः समरतत्वात्। भिन्नकालाचेत्पुरु
षस्य प्रागधिगतभावत्वात्पानध्वजेनम्रतपस्त्रीभावमधिगच्छेत्। तस्मात्स
मरतात् विससरते तथोपचर्यतो स्त्रीचुंबनालिंगनादिभिरुपचरेर्यथाग्रे
प्राप्नुयादिति। स्त्रिया प्रागधिगते भावे पुरुषः युक्तयंत्र एव थशंकयादित्म

त्मनोभावंनिर्धारयितुमिति।कालयोगीन्यपिइति।अपिशब्दाद्भावयोगीन्यपि।
अन्यथाविसृष्टिसुखस्यैवसादृश्यात्कथंभावतोनरतानि।रतिरितितयोर्व्य
वहारार्थंपर्यायांतरमाहरसोरतिःप्रीतिर्भावोरागोवेगःसमाप्तिरितिपर्या
याः।संप्रयोगोरतंरहःशयनंमोहनमितिसुखपर्यायाः।फलावस्थाहेत्वव
स्थाभेदेनरतिरितितयोःपर्यायाःशब्दानामेकार्थविषयत्वेऽपिनिमित्तंनिर्धृतं।य
थैश्वर्ययोगादिंद्रःशक्तियोगाच्छक्रः।तथोपस्थेंद्रियेणरसनादनुभवनाद्र
सः।फलावस्थायांसुखत्वेनचित्तपरिस्पंदेनरमणाद्रतिः।।चित्तप्रणयात्प्रीतिः ७२
कामिताख्येनभावेनभाव्यमानत्वाद्भावः।कामिताख्योऽपिभाव्यतेफलरू
पेणेतिभावः।।चित्तरंजनाद्रागः।अकधातोःसुखानुविद्धस्यनारीसुखादप

यवक्रमणाद्वेगः।नरतस्यसमापनात्समाप्तिरिति।दंपत्योःसम्यक्प्रकृष्टोयोगःसं
प्रयोगः।हेत्ववस्थायांवाक्कायचित्तपरिस्पंदेनरमणाद्रतं।दंपतिद्रव्यातिरिक्तम
न्यंरहयतीतिरहः।शयनीयप्रतिसज्जिकायांशयनाच्छयनं।अन्यव्यापारेषुमो
हनाद्वैचित्त्यकरणान्मोहनमिति।प्रमाणकालभावजानांसंप्रयोगाणामेकै
कस्यनवविधत्वात्।तेषांव्यतिकरेसुरतसंख्यानशक्यतेकर्तुमितिबहुला
त्सूत्रं।प्रमाणकालभावजानांत्रयाणांरतानामेकैकस्यनवविधत्वात्स
मुदायेनसप्तविंशतिः।द्विविधंरतंशुद्धंसंकीर्णंच।तत्रशुद्धस्यासंभवात्
संकीर्णमेवयुक्तमभिधातुमितिमन्यमानःशास्त्रकारआह।तेषामिति
सप्तविंशतेरतानांव्यतिकरेसंयोगेतत्रापिनद्वाभ्यांसंभवात्।त्रिभिरे

वव्यतिकरः।सुरतसंख्यानशक्यंतेवक्तुंप्रत्येकंनिर्देशेनअतिबहुत्वात्।तेषुहिप्रते
कंनिर्दिश्यमानेषुग्रंथगौरवंस्यात्।संक्षेपेणचसंख्यानस्यप्रयोजनंनास्ति।
तस्मात्पूर्वसंख्ययैवयोजनीयमित्यभिप्रायः।तत्रसमंविषमंचसंकीर्णकं।
तद्यथा।शशस्यमंदशीघ्रवेगस्यमृग्यातथाविधया।शशस्यमध्यमंमंदवेगस्य
मृग्यातथाविधया।शशस्यचंडवेगस्यमृग्यातथाविधया।शशस्यचंडशीघ्र
वेगस्यमृग्यातथाविधयेतिसदृशासंयोगेसमानिनवसंकीर्णरतानिए
षामेवनवानांशशानांएकैकस्यनवप्रकारतयोयातथाविधयावडवयायो ७२
गेविषमाणिनवसंकीर्णरतानि।एवंतथाविधानिरष्टाभियोगिष्वासमाति
रितिविषमाण्येवंएवंहस्तिन्यावंत्येव।विषमाण्यसितिविषमाणिचेति।सं

क्षेपेणशशस्यत्रिचत्वारिंशंशतद्वयंतावदेववृषस्याश्वस्यचसमुदायेनसै
कोनत्रिंशानिसप्तशतानि।तेषुतत्कृदुपचारान्प्रयोजयेदितिवात्स्यायनः।
सूत्रं।संकीर्णरतेषुबुध्यापरिच्छिन्नेषुतत्कृदुपचारान्प्रयोजयेत्।प्रमाणका
लभावजेषुयेयथायथमालिंगनादयउपचारानुक्तास्तेसंकीर्णा
नेवयोजयेत्।यथातत्रशासमरतमेवप्राप्यतेतियेकंस्यादित्यर्थः।अत्रबाभ्र
वीयाः।श्लोकः।पौरुषंमेहनंयत्रगमनेनिरिधृष्यते।नावकालोसमानोचतद्र
तंश्रेष्ठमुच्यते।१।मृद्यतेमेहनंयत्रधृष्यतेचनसर्वशः।विषमोनावकाशो
वकानिष्टंतदुदाहृतं।२।सुरतंसर्वसाम्येस्यात्वैषम्येदूरतंस्मृतं।मध्यमा
निचशेषाणितेषुचाल्पबलाबलं।३।बलीयान्सर्वतःकालःकालेपिहि

श्रोत्रोपि सन्ना संसृज्यत्वेव सर्वत्र हस्तिनी मेहनोदरं॥४॥एवंवाजीवकथ्येत
त्रात्रोंकालप्रकर्षणेः।ततःप्रमाणमेवाद्धबलीयः सर्वत्रोपरोप॥५॥बलीया
न्वेगद्रव्यन्येयस्माद्श्वोप्येवेगवान्नेवसाधयितुंशक्तोवेगस्यवप्रकर्षणेः।
६।एवंतुनैवखिद्येतमंदवेगापिनायिका।यथाविषयमेतासांतस्माद्ज्ञेयं
बलाबलं॥७॥हीनोभावप्रमाणाभ्यांवेगकालविवर्जितः।कालप्रमाणहीनश्च
तत्रत्रोषेणसाधयेदिति॥८॥तत्रस्वभावतोयोयस्यभावःकालश्चस्वभावां
तरंकालांतरंचयदाप्रतिपद्यतेतदाभावकालंतरसंक्रांतिस्तांदर्शयितु ७३
मान्॥तत्रप्रथमरतेचंडवेगताशीघ्रकालताचपुरुषस्यतद्विपरीतमुत्तरे
षुयोषितःपुनरेतदेवविपरीतमाधातुक्षयादितिप्राभ्रवस्त्रीधातुक्षयात्तु

रुषधातुक्षयइतिप्रायोवादः।सूत्रंशीघ्रमध्यचिरवेगानांमंदमध्यचंडवेगानां।
अन्यतमस्यप्रकृतिस्थस्यप्रथमरतेसमेदायेहशीघ्रवेगताचद्रष्टव्या।तदानीं
प्रवृद्धत्वाद्रागः।चंडायमानोद्भूतंप्रशाम्यति।तद्यथा।चिरचंडवेगस्यप्रथमर
तेमध्यवेगताचंडतरवेगताच।कालभावाभ्यांमध्यवेगस्यशीघ्रवेगताचंडवेग
ताचद्रष्टव्या।तदानींप्रवृद्धत्वाद्रागः।चंडायमानोद्रुतंप्रशाम्यति।गतानचिरमं
दवेगस्यकालभावाभ्यांमध्यवेगता।चिरमध्यवेगस्यमध्यवेगताचंडवेगताचे
ति।नत्वप्रथमरतेसंक्रांतिरतानितद्विपरीतमुत्तरेष्वपि।प्रथमरतेयदुक्तंत
स्यविपरीतंद्वितीयादिषुरतेष्वित्यर्थः।तत्रकामस्यैकगुणत्वात्।पुरुषस्य
प्रशांतरागत्वात्द्वितीयरतेप्रकृतिस्थतेवाभावकालनरसंक्रांतिः।ततःशनैर्ही

र्धमानरागत्वात्तृतीयादिषु स्वनेदापेक्षया चिरचिरतमवेगतादयो मंदमंदतर
तमवेगतादयश्च धर्माः। यावच्छुक्रधातुक्षय इति पुरुषस्य भवति कालांतरसं
क्रांतिर्योषितः पुनरेतदेव विपरीतमिति। अत्रापि प्रकृतिस्थायाः प्रथमरते स्व
नेदापेक्षया चिरवेगता मंदवेगता च दृष्टव्या। अस्या अदृष्टगुणो हि रागो निसर्गा
देव प्रथमरते न संधुक्ष्यते। ततश्च तदानीं मंदायमानश्चिरेण प्रशाम्यतीति त
द्यथा। चंडवेगायाः प्रकृतिस्थायाश्चिरतरवेगता त्वभावकालाभ्यां मध्यवेगा
याश्चिरवेगता मंदवेगता चेति शीघ्रमंदवेगाया मध्यवेगता मंदवेगता चे ७५
त्येवं। शेषास्वपि षट्कं संयोज्य तद्विपरीतं पुनरेषु द्वितीयरते प्रकृतिस्थेत्वेवसं
क्रांतिः। ततः शनैः २ संधुक्षणात् प्रवर्द्धमानरागवेगयोः स्वनेदापेक्षयाद्रुती

यादिरतेषु शीघ्रतरतमवेगतादयः चंडचंडतरतमवेगतादयश्च धर्मा यावत्
छुक्रधातुक्षय इति। स्त्रीपुंसयोस्तुल्ये धातुक्षये विशेषो यत्पुरुषस्य धातोरेक
गुणत्वात्। योषितश्च पश्चाददृष्टगुणत्वात्। यदाह। प्रागवोचदिति। प्रायोवादइ
ति। न पुंसि --- चनः दृष्यतीति। प्रमाणांतरं संक्रांतिर्वा योषितो जघनप्र
सारणावहासाभ्यां पुरुषस्य च वृद्धिविधिना स्यादिति। शीघ्रमध्यचिरवेगतां य
काइत्युक्तं वेपुनस्तइत्याह। श्लोकः। मृदुत्वादुपमृद्यत्वान्निसर्गाच्चैव योषितः।
प्राप्नुवंत्याशु ताः प्रीतिमित्याचार्या व्यवस्थिताः॥ निसर्गास्त्रिभावतो यास्त्रियो
मृद्व्यो उपमृद्यायोपि याश्चुंबनादिभिर्बाह्यैरांतरैश्चांगुलिकर्मादिभिरुप
मृद्यंते। ताः शीघ्रतरं प्रीतिं प्रसुवंति। शीघ्रवेगा इत्यर्थः। तद्विपर्यये तामध्य

चिरवेग इत्यर्थः॥ तथा पुरुषोऽपीति। तत्र मृदुत्वं स्वाभाविकं लक्षणं। शेषं कृत्रिममि
त्याचार्या व्यवस्थिता इति। सर्वेषामेतदेव मतमव्यभिचारित्वात्। एतावतैव युक्ता
नां व्याख्यातं। आलिंगनादीनुपचारान् कुत्स्नेन योजयंति। न मंद इत्युदय इति। न
देवावापार्थविस्तराभिमानं धातुप्रमाणकालभेदेभ्यो रतावस्थापनं नाम षष्ठ
प्रकरणं॥ ॥यथा त्रिधा रतमवस्थापितं तथा लक्षणस्वरूपाभ्यां प्रीतिरपि
व्यवस्थापिता किंतु तद्व्यतिरेकेणान्या अपि प्रीतयो भिन्नशास्त्रे संभवंतीति तद्
र्शनार्थं प्रीतिविशेषा उच्यंते। अभ्यासादभिमानाच्च तथा संप्रत्ययादपि॥ ३९
विषयेभ्यश्च तंत्रज्ञा विदुः प्रीतिं चतुर्विधां॥१॥ सूत्रं॥ अभ्यासादित्यादिना तं
त्रज्ञाः कामसूत्रज्ञा आचार्याः लक्षणमाहुः। शब्दादिभ्यो बाह्येभ्यो भूतायाः कर्माभ्या

सात् लक्षणा प्रीतिः साभ्यासिकी ज्ञेया॥ मृगयादिषु कर्मसु॥ सूत्रं॥ कर्मसु क्रियामा
त्रेषु तत्रत्या शब्दादिविषयानाश्रित्य या स्यात्। सा विषयप्रीतिरेव। यत्तु
कर्माभ्यासलक्षणा कर्मणां पुनः पुनरनुष्ठानमभ्यासः तेन लक्षणत्वात्तल्लक्ष
णा प्रीतिः। साभ्यासेन निर्वृत्ताभ्यासिकी कर्माश्रयकलाव्यसनानां भवति। य
दाह मृगयादिष्विति। आखेटकं मृगया व्यायामिकी विद्या आदिशब्दान्नृत्यगीत
चित्रपत्रच्छेद्यादिषूपसंग्रहः। अनभ्यस्तेष्वपि पुरा कर्मस्वविषयात्मिका। संकल्पा
ज्जायते प्रीतिर्या सा स्यादाभिमानिकी पुरा कर्मस्वनभ्यस्तेष्वपीत्यपि शब्दा
दभ्यस्तेष्वपीति येनापि मृगयादिकर्मनाभ्यस्तमभ्यस्तं वा सोपि तत्कर्म
कृत्वा मनसा सुखायते। अभ्यासिकीति कर्माभ्यासादेव इति विशेषः। अविष

अविषयात्मिकेति। नापि विषयेभ्यः शब्दादिभ्यः आत्मलाभो ऽस्याः इत्यर्थः। ततस्तु
नीहीत्याह संकल्पाज्जायत इति। मनःसंकल्पात्मकत्वाद् मानसीत्यर्थः। सा चै
वंविधाभिमानिकीत्युच्यते। अभिमानोऽहंकारः। स प्रयोजनमस्या इति। सा क
तत्र द्वितीयपक्षाभावात् तार्कियितव्य इति नोक्तं। यदाह। अनयोरिति। तस्याद्य
स्याश्च ताभ्यामनिःकासितत्वात्। सतोपि गुणेनापक्षस्य च स्फुटत्वात् स्वदोषो
मेवापसृतः ससंहितोपि न स्थायी। न च तस्मादर्थेनियोग इत्यैकैः संधेयः। इतस्त
तश्च निःकासितापसृतः। स्थिरबुद्धिः इतस्ततश्च निष्कासित उपजायते। चेदि ३१३
ति वर्त्तमाने। स्थिरबुद्धिः स्वयमनपसृतत्वात्। अत्र पक्षद्वयमप्यस्ति। यदाह।

ससा
सा च दन्यतो बद्धलक्षमानया निःकासितः स्यात्। ...सारोपितयारोपितो ममाम
षड्विदुदास्यतीति संधेयः। स चेदिति। अत्र तर्कयितव्य इति नोक्तं वेदस्फुटेनैव
यद्ध्ययेनैतदर्थसोक्तत्वात्। अन्यत इति। अनक्कद्रम्याद्बद्धलक्षमानया निष्कासि
तस्य सारोपि सद्भावोपि तत्तश्च तयारोपितो जनितरोषितो षोडशमषड्विदुदास्य
तीति ज्ञात्वा तदानीमेव संधेयः। तेव रोषितत्वात्। नास्यामनुशयं बध्नाति। निः
सारतया कदर्यतया वा त्यक्तो न श्रेयान्। निःसारतया निर्द्रव्यतया ससारे च कद
र्यतया वत्यदास्तवतामतयात्यक्तो निष्कासितथा न श्रेयान्। संधानमिष्टापि क्ले
श्यत्वादइतः स्वयमपसृत्य ततो निष्कासितैर्थानैपसृतो। यच्चातिरिक्तमादोच
दद्यात्। प्रतिग्राह्यः। द्रवः स्वयमुपसृतः। ततो निष्कासितो — इत्यत्राप्युपज

येदितिवर्त्तते। अत्रापि यादृशात्स्थानात्कर्षयितव्य इति नोक्तं। अतिरिक्तं पूर्वस्माद्दाना
त्। आदेशनया — र्थसंप्रयोगः। उत्क्रुत्यस्य हि स्वयमपसर्पणे संभवात्प्रति
ग्राह्य संधेयः। अत्र विपर्ययिणा प्रतिग्राह्य इत्यर्थोक्तिर्द्वितीयः पक्षः। इतः स्वय
मपसृत्य तत्र स्थितः। उपजपंस्तत्कर्षयितव्यः। किमुपकर्त्तुं चोपजपतीति। तत्र सं
धेयपक्षमाह। विशेषार्थी चागतः। तत्र विशेषमपश्यन् तदर्थं गंतुकामो मां
जिज्ञासितुकामः स्वयमागत्य सानुरागत्वाद्दास्यतीति तस्यां वा दोषान् दृष्ट्वा मामेवानु
यिष्ठात् गुणानस्तुनापश्यति। स गुणदर्शी भूयिष्ठं दास्यति। बालो वा नित्रद ३२५
ष्टिरिति संधानप्रधानो वा हरिद्रारागो वारात् किंचनकारी। अवेव्य संदध्यात्। वा
विशेषार्थीति। विशेषार्थितया यत्र गतस्तत्र विशेषं सुरतगतं न पश्यन् तस्या

अविदग्धत्वात्। तत इति तस्याः सकाशात्। अस्मिन् सूक्ष्ममागंतुकामो मयि दृष्टवि
शेषत्वात्। मां जिज्ञासयितुकामश्च य इति। तत्रस्थ एव मयि जिज्ञासां कर्त्तुमिच्छन्। मि
यं मा स्वयमपसृतमिच्छतीति नीति सानुरागत्वाद्दास्यतीति दृष्टविशेषत्वात्तस्या वा
दोषान् गुणविपर्ययान् दृष्टवान्। आगंतुकाम इति योज्यं। स स्तुवन् गुणेषु मयि
भूयिष्ठात् प्रभूततमान् गुणान् पश्यति। तद्गुणान् लोकान् दृष्ट्वा स उत्तमय
स्मिन्नपि पक्षे मयि गुणदर्शी भूयिष्ठं प्रभूततमं दास्यति। असंधेयपक्षमाह।
बालो वेति। हरिद्रारागवद्रागो यस्य न चिरस्थायी। मयि विरक्तो यत्र गतस्तत्रापि
विरक्तः सुतरां गंतुकामः। किं दास्यति। यत्किंचनकारीव सोमर्यमपिक्रयति।
इत्येवमेत्य ज्ञात्वा संदध्यात्। प्रथमे पक्षे नवेति नैव संदध्यात्। द्वितीये तु नि

क्कासितापसृतस्ततः स्वयमपसृतमुपजयंस्तर्कयितव्यः। इत्युपकारापकाराभ्यां
अनुरागादर्गतुकामः शक्तस्य निष्कासितत्वात् मद्गुणैर्नाविलोरंजितो यां योन
स्यां नरमतेयेन ततोपि स्वयमेमेवायस्ततः पूर्वसंयोगेच्चेत्यान्यायेनानिष्कासि
ता। समावृीक्षयित्वाइत्यनुरागप्रदर्शनेनानुप्रविश्य वैरनिष्ठां तां यस्तु कामः प्रय
च्छन्न प्रदत्ममनया। हठान्निष्कासित इति। धनमभियोगाद्वृत्तिभ्रंस्यानियोगमेव
कुर्वत्यानया धनं बहूपहृतं। आकृष्टं संप्रयोगश्च कादाचित्कः कृतः। नत्ववं स्नेहोप
यनेन मां विश्वास्य प्रतीयमादास्तु कामः। प्रयच्छन्नप्यत्वमनया हठान्निष्कासितइ ३१५
ति। निर्विद्धु कामोवेति। निःशेषवीविशातिनिर्विशेषः कृतोवर्त्ततो इदानीं धनं संप्रयो
गे तदेवध — — वैशिकर्त्तुकामो नान्यद्रष्टुकामः। मां वर्त्तमानादिति निः कास्ये

नं येन सह वर्त्तते तस्माद्वर्त्तमानाद्रागंतुकामात् गंधाः स्तनमां भेदयंति। मान्द्वद
स्यक्षान्तेन योग इति स्वयं दास्यत्तिवेदात्। तत्नु काम इति। अकल्याणबुद्धिर्वैर
बुद्धिरिति। निर्यातिना स्मृतिप्रायः। अन्यथा बुद्धिरागाद्रष्टुकामः। कालेन तदा
नीमेव तस्य निष्कासनेनायाद्दित्तवैष्ठतत्वात्। संनायितव्य इति। प्रापयितव्यो
न्त्वप्राप्यः। स्वातंत्र्येण लाघवादृ एतेनेत्यनंतरोक्तेन। विशीर्णेनि व्याख्यातः।
यमापितथैव तर्कयित्वा अकल्याण — — संधेयो अन्यथा बुद्धिकालेनस
नायितव्य इति निष्कासितस्तत्रास्थितउपजयंश्चेत्कर्त्तयितव्यः। तेषुपजपत्सु
अस्थितः स्वयमुपजयेत्। सूत्रं। तेष्विति। योन्यत्रगतो येन गताः संधेया। तेषु
पजपत्सु अनुपजपत्सु लाघवात् अन्यत्र स्थित इति। द्विधा वर्त्तमानस्य जः। इ

तदर्द्धेतितत्रापिस्थितोकारणापेक्षयास्वयमुपजपेत्।बहूनिकारणान्याह।व्य
लीकार्थंनिष्कासितोमयासावन्यत्रागतोयत्नादानेतव्यः।इतःप्रवृत्तसंवादोवात
तोनिरमवाप्स्यसिवर्त्तमानस्यचेदर्थंविघातंकरिष्यामि।अथागमकालोवास्या
ल्स्थानवृद्धिरस्यजाता।अस्मिन्ननेनाधिकारेणदारैर्वियुक्तःपरतंत्र्याद्वावृत्तः।पि
त्राभ्रात्रावावियुक्तः।अनेनवाप्रतिबध्यमानेनसंधिंकृत्वानायकंधनिनमवाप्
स्यामीति।विमानितोवानार्ययातमेवतस्यांविक्रमयिष्यामि।अस्यवामित्रंमद्वे
षिणींकामयते।तामुमात्भेदयिष्यामीतिचलश्चित्तयावा।अन्यमेवमापादयि ३९६
ष्यामि।अस्यवामित्रंमद्वेषिणींकामयते।तामनेनाभेदयिष्यामीतिचलचि
त्तयासत्यपरानुरागेतिवसायाः।पूर्वंनिष्कासितंवर्णयित्वा।वर्त्तमानेनवाका

र्याःसंस--द्धिंवावस्याःप्रसात्रिष्क्रान्तेःपूर्वानुरागैरेनंप्रत्याययेयुः।अनिष्क्रा
न्तंचतत्कृतोपकारसंबद्धंस्यादिति।विशीर्णप्रीतिसंधानं।सूत्रं।व्यलीकार्थमि
ति।व्यलीकमपराधोजनन्यस्यामन्निगमनंतन्निमित्तंमयानिष्कासितोनपुन
र्द्दातीतियत्रादानेतव्यः।ततोहिपूर्वेणानयोगात्।इतःप्रवृत्तसंवादोवेतिमामु
द्दिश्ययत्प्रवृत्तसंवादः।इदंदास्यामीति।नतदितियत्रगतः।तस्याःसकाशाद्वेदग
वाप्स्यति।किमन्यस्यादास्यामीति।तदर्थंविघातंकरिष्यति।येनवापेतदर्थोवि
तमानोविलक्षीभूतोनिःक्रामति।अथागमकालोवास्यवर्णिज्ययासेवया
स्थानादिवृद्धिमात्रेणाधिकस्यलाभात्।तत्रवातेनाधिकरणेमत्कृपरक्षादिकं
दारैर्वावियुक्तोममेदानिमवरःप्राप्तः।पारतंत्र्याद्वावृत्तःकमस्थानेष्वगृहे

वास्वतंत्रश्चुतंदास्यं विपन्नाजविनैव। विनक्कोचात्राचापितारिभृतेऽनेनवाप्रतिब
द्धमितितस्य मित्रत्वात्। अनेनसंश्लिष्टत्वात्संक्रमः स्थानीयेन विमानीतोवेतिम
नो विशीर्णः स्वनायर्या संसृष्टः। तांचास्मात् दुमन्न रिवमानितांचानोष्ठांतमेव
संधाय तस्यां विक्रमयिष्यामि विग्रहं करिष्यामि। आक्रोशान्नियतिनायमस्यवा।
विशीर्णस्यवामित्रं सच्छिद्रव्यसंपन्नंम। द्वौ घ्रेणिमपहृत्तुकामां ममसपत्नीवर्त्त
मानांम्हृतश्वत् कामयतेतान्मित्रस्थैव्याधुना विशीर्णेनिष्पादयिष्यामि। येन
साक्षाज्जेननयोध्यतोमाचोपकरिष्यतीनक्षाचिन्नतयावर्ति। इतीन्यत्रगतस्त ३२१
तोप्यन्यत्रागतः नमयोचिन्नक्षाचिन्नतयाक्षाम्बवमापादयिष्यामि। स्वयमुपज
येरित्युक्तं। तस्यस्वरूपमाह। तस्येतिविशीर्णस्यामात्यदौःशील्येन्येति। मा

नलैरस्यादुःशीलाजयार्थपरित्यक्तनिष्कासितः नायिकात्वय्यरक्तैव। केवलंपरिवञ्च
सति। वर्त्तमानेनचगम्येनयः संसर्गसंप्रयोगो नायिकासोकामायाश्च निर्घृत्याश्चोष
धयानवत्। विद्धे परमार्थतः। तोयत्तस्यदर्शनियर्थेपि नातिष्ठतीतिवर्णयेयुः। त
स्याश्चेतिनायिकायाः साभिज्ञानैरितिसाभिज्ञानंचपूर्वानुरागैरितिपूर्वविशीर्णा
यांयेनुरागात्त्रासन्नएनं प्रत्याययेयुः। नायकंबोधयेयुः। येनतथैव प्रतिपद्य
तेतत्कृतापकारसंबद्धमितिनायकेनयः कृतउपकारोऽर्थेनिश्च नर्थप्रतीकार
एवातेनयुक्तंस्यात्। कृतज्ञानास्वचनार्थंस्त्रिष्वन्स्यासंत्रवेविशीर्णप्रतिसंधा
नमुक्तंतस्मिन्न पूर्वविशीर्णेनोपजपति। श्रुतिनसंधानंयुक्तमित्याह। अपूर्व
पूर्वसंसृष्टयो पूर्वसंसृष्टः श्रेयान्। सहिविदितशीलोदृष्टानुरागस्वरूपत्वा

वा०सू०जा०
२२८

रोनवर्तीत्याचार्याः। सूत्रं। अपूर्वपूर्वसंसृष्टयोरिति। विद्याद्विशेष इति संवासेन ज्ञानस्य
भावोद्दिष्टानुरागस्य पूर्वमासक्तत्वात्‌ सधुनयधमख्यासितत्वात्‌ कान्तानुवृत्त्या सु
खेनोपचार्यत इति वात्स्यायनः। सूत्रं। नात्यर्थमर्थद इति। अर्थार्थी संधीयते। सवेत्रय
थावत्‌ किंतनसंहितेन दुःखं च पुनर्विश्वासयितुं तस्यासत्यापि विदितशीलत्वेदृष्टा
नुरागत्वेन च निःकासनोत्पादितवैरूतत्वात्‌ सुखेननानुरज्यत इति। तेनतद्दोषस्या
दृष्टत्वात्‌ -- वानिष्ठारितर्थत्वादत्यर्थमर्थद इत्यर्थः किं। पूर्वाद्विविधः। तत्रत्यो
इतश्च। अन्यवेश्यासंसृष्टोऽसंसृष्टश्चेति। संसृष्टोपि द्विविधो निःकासितोऽनि २२८
ष्कासितश्च। तेषां संधानोपायो गम्योपावर्तने दृष्टव्यः। तत्रापि पुरुषप्रकृततो वि
शेषः। सूत्रं। पुरुषप्रकृतेत इति। पुरुषस्वभावत्वात्‌ कः स्यात्‌ दृष्टत्वेपि दुरुपचरः।

करः यश्च भवति पूर्वसंसृष्टश्च निःपीडितार्थोपि दाता। निष्कासितोपि स्वविश्वास इति
संक्षेपेण संधानं। त्रिविधं कारणं। नायकान्तरस्थं विशीर्णस्थं वर्तमानस्थं चेति। तदेव
इष्टियत्राह। भवंति चात्र श्लोकाः। अन्यां नेदयितुं गम्यादन्यतो गम्यवक्तुस्थितस्य चोपधा
तर्थं पुनः संधानमिष्यते। सूत्रं। अन्यामिति। नेदयितुं विशीर्णत्वान्नदानेन विमानिताम्‌।
यथा तमेव तस्यां विक्रमयिष्यामि। अस्य वामित्रं मदूषिणीं चाकामयत। तदमुना भेद
यिष्यामीत्युक्तं वेदितव्यं। स्थितस्योपधात्तार्थमित्यनेन तदर्थं निघातं करिष्यतीति।
अत उक्तं। अन्यतो गम्यमेवेति। अन्यस्या नायिकातो विशीर्णं नेदयितुमिति भनेना
पि विशेषं विशीर्णस्थं कारणमुक्तं। संप्रयोगार्थी हि न विशीर्णं संधत्ते। नातादृशम
स्य संधानं। यत्र वर्तमानमपेक्षकं विशीर्णं चेत्यनुरक्तं चापेक्ष्यते तद्वत्संप्रयोग इति

गृहीत्वा नस्य संसर्गं स्त्रीलोकानिवर्त्तंतां अतिसक्तः पुमान् यत्र न स्याद्वा दुर्दशातिबाधा
सक्तमप्यनिर्दिष्टे शक्तं परित्यजेत् तथा। अन्यद्वृत्तानुपाते च यस्या इति विशारदस्ततः
पयापयिनं पुनरपि कालेन योजयेत्। न चेत्वाच्छिन्नं संधानान्न च शक्तं परित्यजेत्॥३॥ सू
त्रं। विच्छिन्नेष्वेति। यत्र यस्मिन् संधाने वर्त्तमानो अतिसंसक्तो ऽप्यन्यस्य संयोगाद्भिन्ने
ति। इति। संयुक्तोयं कदाचिदयं करिष्यतीति व्यलीकान्निदानायि कालं कृतानां। अप
राधान्नेहं तो अवधीरयति अतिशक्तत्वादेव -- इति परित्यागनयात्। बहुदरा
ति। असक्तमिति। यो विशीर्णोप्यतिरक्तः अतिरक्तत्वात्। वर्त्तमानं तमसक्तमपि ३१९
इति विशेषा जावात्। वदस्यां नरक्तइति। शक्तं परित्यजेदलक्षणावस्था प्राप्तस्य चिरेणे
ति। अन्यद्वृत्तानुपाते चेति। अपूर्वस्य संबंधिन्यायाते इति अतिविशारदो अत्यर्थ

मर्थदोभातुरनेन संधानमिति। तत्रेति तस्मिन् संधाने एवमिति। एवमसंसृष्टं विशीर्ण
मुपयापितां नारीभिः समान्यापिधानेपि प्रकरणाद्वैश्येन द्रष्टव्या। कालेन योजयेत्
न तदैव संप्रयोजयेत्। अन्यथा तदान्न एव वर्त्तमानेनापि शक्तेन फलवता विश्लेषः स्या
त्। विशीर्णेप्यतिरक्तत्वात्। प्रत्याशया कालांतरमपेक्षत एवायदा हि। न चेदाच्छिन्न
संधानेति। विशीर्णेनि सहेत्यर्थः। न च शक्तं परित्यजेत्। न दान्न एव तस्य सफलत्वात्।
यस्तु तदात्व अन्यस्मात्साभो महानेव संप्रयोगं विना। वत्र किं प्रतिपत्तव्यमित्या
ह। सक्तं तद्वशीनं नारी संनाष्यापयन्यतो व्रजेत्। ततश्चार्थमुपादाय रक्तमेवानुरं
जयेत्। सूत्रं। शक्तं चेति। वसितं यथोक्तकारिणं। अन्यत इति। अन्यमुद्दिश्याध्व्रज
त्। ततश्चेति तत्राप्रव्रजिता रक्तमेवानुरंजयेत्। सूत्रं सक्तं लिंतेति विसिनं। यथो

योक्तकारिणं। अथ लड् इत्यन्यमुद्दिश्य व्रजेत्। ततश्चेति। तत्र प्रव्रजिता शक्तमेवानुरं
जयेत्। कांतमुद्दृत्य। तत्रास्थितत्वात्। नान्यप्रतिसंधिना। प्रोक्तानुष्ठेन निरूप्याभि
त्यात्। आयतिप्रसमीक्ष्यादोषानंधातिं च पुष्कलां सोढुं प्रतिसंदध्यात्। विशी
र्णस्त्री विचरणा। सूत्रं। आयतिमिति। प्रभावं लाभमायत्यां नदाते धातिपुष्क
ली। निर्वर्जितस्यात्मविषयविचरणेति परान्हणे विस्तरणाक्रोशा इति वि
शीर्णप्रतिसंधानं षट्पंचाशं प्रकरणं। इति वैशिके षष्ठेधिकरणे चतुर्थोध्या
यः। आदितो द्वात्रिंशः। त्रिविधा वेश्या एकपरिग्रहा अनेकपरिग्रहा अपरि ३२०
ग्रहा चेति। तत्र पूर्वस्या लाभ उक्तः। द्वितीयायाः वक्ष्यामि। तृतीयाया विनापरि
ग्रहमनेकस्मात् लाभं समानायाः लाभविशेष उच्यते। तत्रापरिग्रहकारणमाह।

गम्यबाहुल्ये च बहु प्रतिदिनं लभमानायानेकं प्रतिगृह्णीयात्। सूत्रं। गम्यबाहुल्य
इति। यदा गम्या बहवस्तेभ्यश्च स्पर्ध्या बहुलवतः प्रतिदिनं चैकैकमभिगच्छंती
तद्दिनेकं प्रतिगृह्णीयात्। स हि प्रतिदिनं च न ददाति। तदेवमनियतो लाभः। स
ततश्च कश्चित्स्वल्पमपि दद्यात्। तद्ग्रहणे चान्ये तावन्मात्रकमेव दद्युरित्यहो दे
शं कालं स्थितिमात्मनो गुणान् सौभाग्यं चान्योभ्योन्यूनातिरिक्ततां चावेक्ष्य रज
न्यामर्थं स्थापयेत्। सूत्रं। देशमिति। देशं संपन्नमितरं वा। कालं यत्र कामउ
द्भूतरागो वा। स्थितिं। देशप्रवृत्तिं यथा अधरकायसेवमानस्यैकगुणः पूर्व
कायमपि द्विगुणः। आत्मनो गुणान् रूपवैदग्ध्यादीन् सतोऽसतो वा तथा सौ
भाग्यमन्यान्य इति मेघाभ्यस्थानमानाभ्यां आत्मनश्च न्यूनत्वं चाधिकं च

वे--तदनुरूपं रजन्या मेथं स्थापयेत्। ह्यमेकं रात्रिं नियतासेति इति तत्र यदा
बस्थापितेनार्थेन गम्य एव दूतसंप्रेष--णायति। सिद्धं कार्यं निवेदितात् गम्ये
दूतांश्च प्रयोजयेत्। अनवस्थितिबद्धांश्च स्वयं प्रहिणुयात्। सूत्रं गम्ये दूतांश्चेति त
त्प्रतिबद्धानन्तु गम्यते गम्यते गम्यप्रतिबद्धान् प्रयोजयेदभिप्रायजिज्ञासार्थं। वि
दिताभिप्रायान् स्वयं च प्रहिणुयात्। सूत्रं प्रेषयेदात्मीयानित्यर्थः। दूतसंप्रेष
णात् गम्यसंप्रयोगं रजन्युपार्जनः। तस्मान्नियमितादधिको योऽनुरागाल्लभ्यते
। स लाभातिशयः। तं चेतदेव लभ्यते तेन द्रव्यमेव। नो चेदत्रात्। द्वित्रिश्चतुरिति लाभा
तिशयग्राहार्थं एकस्यापि गच्छेत्। परिग्रहं चाचरेत्। सूत्रं। लाभातिशयप्रतिग्रा
हार्थमिति। द्वित्रिश्चतुरिति। इति शाश्वतिकयोर्थद्वित्रीन् चतुरो वा नेकस्यापि मूल्यं

गच्छेत्। परिग्रहं चाचरेत्। परिग्रहं कल्यं चेति। तावत्सु दिवसेष्वन्यनिरपेक्षानुरंजनेन
विधिनाचरेदित्यर्थः। इदानीं नियतमनियतं च रजन्यर्थलाभमधिकृत्यार्थितया द्रव्य
स्वरूपतो गम्यतश्च विसंवादात् गम्ययौगपद्येन लाभसाम्ये यद्द्रव्यार्थिनी स्यात्तदा
यिनि विशेषः प्रत्यक्ष इत्याचार्याः। अप्रत्यादेयत्वाद्धि--ण्यं। सूत्रं। लाभसाम्ये इ
ति। यदि बहवो गम्या युगपदुपस्थिताः एको हिरण्यं अपरस्तुल्यमूल्यं लाभं तोये
न द्रव्याणि तीनद्दाभ्यि निगमे लाभविशेषः प्रत्यक्षः तस्यार्थिनी स्यात् इत्याचार्या
ण्यं तन्मूलत्वाद्धिरण्यस्येति वात्स्यायनः। अप्रत्यादेयत्वादिति। हिरण्यमंत्र लो
कप्रतीत्या कपर्दिकाः। तिच्चेदत्र गामो न पुनर्न प्रत्यायं तो वस्त्रादिकं दत्वा किंचित्
प्रत्यादत्ते। सर्वकार्याणामिति। तद्द्रव्यं मंडनमन्यच्च कार्यं सर्वं हिरण्यमूल्यं ते

ना०प्र०प्रा०
वा०हस्त०ना०
३२२

नक्षन्यमानत्वात्। तेनततएवविशेषः। तस्मात्तत्रैवार्थित्वं कर्त्तव्यं। द्रव्यस्वरूपमाह।
सुवर्णरजतताम्रकांस्यलोहभांडोपस्करास्तरणप्रावरणवासोविशेषगंधद्रव्यक
टुकभांडघृततैलधान्यपशुरूपजातीनां पूर्वपूर्वतोविशेषः। पत्तनसात्म्याद्वा
द्रव्यसाम्येमित्रवाक्यादतियातित्वादायतितोगम्यगुणतः प्रीतितश्चविशेषः।
सूत्रं। सुवर्णेति। सुवर्णरजतेघटितेऽघटितेवाताम्रकांस्यलोहेघटितं। भांडोप
स्करं। आस्तरणं तूलिकादि। प्रावरणं कंबलादि। वासोविशेषयोग्यादि। गंधद्र
व्यं चंदनादि। कटुकं मरीचादि। भांडः पटुघटादि। पूर्वः पूर्वतइति। सुद्रष्टपशुजा ३२२
तेषु न्यंततस्तैलादि इत्यादिना विशेषः। धान्यपशवोयत्र प्रबलास्तु वेश्यानां
नप्रशस्यंते। पत्तनसात्म्याद्वेतियद्वा एतन्नतोप्रियं ततो विशेषः। द्रव्यसाम्य

साम्यइतियदाद्वावपितुल्यतः प्रमाणतश्चसंप्रयच्छतः। तत्रमित्रवचनमनुष्ठेयं। य
त्रवातदानीमदीयकायामितिगम्येसतिप्रतिवनिर्गंयिकायानायकस्य नायकाया
मितिगम्यतोविशेषमाह। रागवत्यागिनोस्त्यागिनि विशेषः प्रत्यक्षइत्याचार्याः। सू
त्रं। रागित्यागिनोरिति। रक्तात्यागिनोविशेषः प्रत्यक्षस्तदान्यएवद्रव्यप्राप्तेशक्यो
हिरागिणित्यागः। आधासुंगुलादिरक्तस्यजति। नतुत्यागी। निर्बंधाद्दात तेवा
स्यायनः। रागिणोतिश्चत्यागिनोरक्तेशक्यस्त्यागः। आधाश्चमुपायेनाकृतइ
त्याह। गुब्रापीति। व्यजतिद्रव्यं नददाति। निर्बंधादिति। प्रयासेनापिनरज्यतेत
स्यतेजस्वित्वात्। अक्लुरक्तस्यमत्यजति। तत्रापिधनवधनवदतोद्वितिवि
शेषः। सूत्रं। तत्रापिधनवदधनवोरितिरागित्यागिनोर्योधनवान्सविशे

ष्यतो नेतरो निर्गुणस्त्यागी प्रयोजनशत्रोः प्रयोजनकर्त्तरि विशेषः। प्रत्यक्ष इत्याचा
र्याः। प्रयोजनकर्त्तरीति नायिकाकार्यस्य यः कर्त्ता। तस्मिन्न त्यागिनि विशेषः। प्रत्य
क्षस्तदा तत एव कार्यकारणात्। त्यागी उदास्यतीति प्रत्यक्षः। प्रयोजनकर्त्तसिद्ध
त्वात् कृतिनमात्मानं मन्यते त्यागी। पुनरतीतं नापेक्षत इति वात्स्यायनः। सूत्रं। स
कृत्कृत्वेति। एकवारं कृत्वा कार्यं कृतं तन्मेति कृतमस्याः कार्यं किमपरं करिष्या
मीति। अतीतमिति दत्तमेवास्येन पुनर्ददामीति नापेक्षते त्यागशीलत्वात्। तत्रा
प्यात्यायिकतो विशेषः। तत्रापीति प्रयोजनकर्त्तरि अत्येकत इति। यदा तत्प्रयो ३२२
गेन मवधारितमिति पतति। तदा तत एव विशेषः। कृतज्ञत्यागिनोः त्यागिनि
विशेषः। प्रत्यक्ष इत्याचार्याः। सूत्रं। -- णीत्यकृतज्ञेत्यागिनि विशेषः। प्रत्यक्षो

दृष्टस्तन्निवर्त्तकस्तेतस्त्यागित्वात्। चिरमाराधितोऽपि त्यागी व्यलीकमुपलभ्य प्र
तिगणिकाया मिथ्यादूषितः श्रममतीतं नापेक्षते। सूत्रं। चिरमिति दीर्घकालं। आ
राधितोऽपि कांतानुवृत्त्या व्यलीकं नायिकापराधमुपलभ्य मिथ्यादूषित इति मिथ्ये
वदोषं ग्राहितः। सदैवेयं व्यलीकं करोत इति श्रममतीतमाराधनक्लेशं नापेक्ष
ते। कृत इत्याह। प्रायेण हि तेजस्विनस्त्वृजवो नादृताश्च त्यागिनो भवंति। सूत्रं
। प्रायेणहीति प्रायेण बाहुल्येन त्यागिनां तेजस्वितादयः त्रयो धर्माः संभवं
ति। तत्र तेजस्वितया व्यलीकं नायिपेक्षंते। कृजुतया मिथ्यादोषं ग्राह्यंते। नाद
रात् श्रममपेक्षंते। ततः कथं द्रमारः पूर्वश्रमापेक्षीति। कृतज्ञः पूर्वश्रमापेक्षीन
सहसा विरज्यते। परिश्रम परिहितशीलत्वान्न मिथ्यादूष्यत इति वात्स्या

यनः। सूत्रं। कृतकृत्वाद्देव न सहसा विरज्यते। व्यलीकमुपलभ्यापरीक्षितश्री
लत्वाच्चेति। कृतकृतैव परीक्षणे स्वभावला अमित्थैवदोषं ग्राह्यते। तत्राप्याय
तितो विशेषः। सूत्रं। तत्राप्यायति तद्वत्ति। यत्र प्रभावोस्ति यत्रार्थोपिगमनं दे
ऊः तथा। मित्रवचनमनर्थप्रतीघातो अर्थसंशयश्च। तेषां विशेषमाह। मित्रव
चनार्थागमयोरर्थागमे विशेषः। प्रत्यक्ष इत्याचार्याः मित्रवचनार्थविगमयो
रितिअर्थागमो विशेषः। प्रत्यक्षः। तस्य दृश्यमानत्वात्। सोप्यल्पार्थागमो भवि
ताभिः त्रुसष्टव्याक्येव प्रतिहते कलासितं स्यादिति वात्स्यायनः। अन्यत्र मित्र ३२४
वचनमेव केवलं सूत्रं। सोपि अर्थागमो भवति। न विष्यति प्रतिहते इत्यनु
निष्ट्ते कलुषितं रोषितं स्यात्। ततश्च तल्पति बहुकार्यहानिरेव स्यात्। तत्रा

प्यतियद्दत्ते विशेषः। सूत्रं। अप्रतिपत्तत इतियदा तदानीमुपेक्षितोर्थो पततिर्वदा
वस्य एव विशेषः। मित्र कलुषितं स्यादिति चेदाह। तत्र कार्यसंदर्शनेन मननीय
स्तोभ्यूत न वचनमस्ति इति। ततोनिपातितमर्थं प्रतिगृह्णीयात्। तत्रेति कार्यसंद
र्शनेनेति। जन्ममर्थार्थं। तत्र वापि कार्यं निर्वर्त्य मल्पद्रुपस्थितमतिपतति। तद्वच
नं च स्वः कर्त्तव्यमित्यनुयष्टव्यमुक्ता। अर्थागमानर्थप्रतीघातयोरर्थागमे विशेषः।
।प्रत्यक्ष इत्याचार्याः। सूत्रं। अर्थागमे विशेषप्रत्यक्ष इति दृश्यमानत्वात्। अर्थः
परिमितावच्छेदः। अनर्थः पुनः सकृत्तोसकृत्प्रसृतो न ज्ञायते। क्वावतिष्ठत इ
तिवात्स्यायनः। अर्थ इति परिमितावच्छेद इति। अस्यावच्छेद इयत्ता। सापरिमि
तायस्येत्यर्थः स्यानन्तिशायत्वात्। सकृत्प्रसृत इति अखंडित प्रसरत्वात्। एक

वारप्रवृत्तौ न ज्ञायते क्वावतिष्ठति किं मूलघाते सर्वघाते वेति। अत्र मधुबिंदूपा
ख्यानमुदाहरणं। तत्रापि गुरुलाघवकृतो विशेषः। सूत्रं। गुरुलाघवकृत इति
लाघोरनर्थदिष्टवत्यि गुरुरर्थो विशेष्यते। लघुचेद्गुरुरनर्थ इति एतेनार्थसं
शयादनर्थप्रतीकारो विशेषो व्याख्यातः। एतेनेति। अनंतरोक्तेनष्टवेत्तिरप्ये
ण तस्मादर्थस्यान्न वेति। संशयोन्यस्मादनर्थप्रतीकारः। तदार्थसंशये विशे
षः। प्रत्यक्षः। तत्र संदृश्यितेपि लोकस्य प्रवर्त्तनात् ष --- वल्लेदो धेनिर्थः पुनः
सकृद्प्रवृत्तौ न ज्ञायते। क्वावतिष्ठत इति। अत्रैव विशेषः। न संघोस्नर्थलि। ३२५
प्रतिकर्त्तव्याद्गुरोरर्थसंशये तो विशेष इति व्याख्यातः। एवं द्विविधं रतन्यर्थे
न विशेषतेनयद्गुपरिचिंतयनं स प्रकृष्टो नाम लाभातिशयः। प्रधानार्थनि

साधनात्। अन्तस्तद्वारेण तस्यायतनं दर्शयित्वाह। देवकुलतडागारामाणां करणं
स्थलीनामग्निचैत्यकानां निबंधनं गोसहस्राणां यात्रांतरितं ब्राह्मणेभ्यो दानं देव
तानां च पूजा स्युद्दत्तयवर्त्तनां तद्वसहिस्लोवर्धिनस्य प्रतिग्रहणमित्युत्तमगाणिका
नां लाभातिशयः। सूत्रं। देवकुलेति। विविधा वेश्यागणिका रूपाजीवा कुंभदासी चा
ताः प्रत्येकमुत्तममध्यमाधमभेदात् त्रिविधा तडागं पुष्करिणी स्थलीनामिति निम्न
भुप्रदेशेषु लोकागमनार्थं सेतूनां निबंधनं अग्निचैत्यानामिति स्थानाद्दुहिसाड्डि
गेहान्तिकलासर्वसिंराधत्रीहिरनेषु प्रदेषु राश्रयर्ययात्र ग्नैये सं सज्यंते। पात्रां
तरितमित वेश्यादूव्यस्याप्रतिथियघ्नला ताः चन्या हस्तेन दानं देवताः पूजनानां
प्रवर्त्तनं घटानिबंधने उपहाराणां च नृत्यादीनां तस्यो पत्तां दर्शयित्राह। देव

कलत्रागारसंभारणं करणं। कलादिवत्। समुद्दिश्य सर्वमिति तत्प्रधानोर्थः। तद्वैसहितो
ऽपीति। तस्मिन्प्रधानार्थसाध्ये यदास्तां स्वतंत्रो धनस्य परिग्रहणमयं। अयं प्रकृष्टो रागा
तिशयः उत्तमगणिकानामिति। रूपादिविनिर्यिकागुणकलादितिरत्नरिता उ
त्तमगणिकाः गुणानां च पादाद्यर्द्धाभ्यां मध्यमाधमाः। सा वणिको खकारस्योगोगृह
स्योद्वाहणकरणं। महार्हैर्निर्ज्ञितैः परिचारकैश्च गुरुपरिच्छदस्योज्ज्वलितेति। रू
पाजीवानां सामान्यातिशयः। सर्वाणि करोतीति सर्वेषु अंगेषु योनवतिउदारस्येति। सं
स्थानतः सकेतनश्च महार्हैरिति। सोह्नतानुरजातः परिचारकैरिति। यथास्वं ३२९
कर्मणि परिचरंति। गृह परिच्छदस्येति। गृह संविधानकस्य उज्ज्वलतेत्ययं
प्रधानार्थस्तिद्याय स हि सोढुनिस्य परिग्रहणमिति वर्त्तते। अयं प्रकृष्टो सामा

तिशयः रूपाजीवानामिति। उत्तमानां गणिकाना -- स्वपिगुलेषु रूपाजीवं वासां
रूपस्य प्रधानत्वात् कलास्तु न संति। तत्र रूपस्य गुणानां च पदार्थानां च मध्यमा
धमाः -- यः प्रधानार्थः। सगणिकानामस्त्येव। नित्यं शुक्लमाच्छादनमपरूक्षमन्न
पानं नित्यं सौगंधिकेन च तांबूलेन योगः। -- रण्या नागमसंस्करणमिति। कुं
भदासीनां सामान्यातिशयः। सूत्रं आच्छादनमिति। परिधानीयं प्रावरणीयं च। सदे
वसुत्रु अपरूक्षमित्य कदर्थितत्वात्। शुक्लमुपनयति। सौगंधिकेन सुगंधिमृ
द्धेन। चतुःसमादिना तांबूलेन च नित्यं योगः। एतत्सर्वं गणिकानां रूपाजीवानां चा
स्त्येव। विशेषमाह। सहिरण्यघणमिति। सुवर्णालंकारेण युक्तमित्यर्थः। स्वयं
प्रधानद्रव्य स हि सोढुनिस्येति वर्त्तते। परिग्रहणं अयं च प्रकृष्टो सामान्यातिशः।

बा॰ स्त्र॰ ना॰
बा॰ स्त्र॰ ना॰
३२७

क्तं नदासीनामिति। इत्युत्तमानां वक्तं न ग्रहणं च कर्मापि च स्नेहणार्थं। कर्मकरीणामि
त्यर्थः। आसां चोत्तममध्यमाधमकर्मापि स्नेहेव तथाविधत्वं द्रष्टव्यं। एतेन प्रदेशे
न मध्यमाधमानामिति गणिकारूपाजीवाकुंभदासीनामाज्ञातिशयानीति। प्र
रूढापेक्षं मध्यमाधमा नु योजयेत्। तथा चोक्तं। यद्दास्यात्स्वर्जितं द्रव्यं प्रधाना
र्थस्य साधकं। अवस्थानहि। वस्यानां सखामुत्तमोक्त इति। सूत्रं। इयमवृत्ति
रिति। वेशस्य संप्रपन्नस्य सुनिरूपस्य दुर्निरूपस्य वा विभस्यान्वीयस्य मर्थद्वारे
णयानिर्दिष्टा — इति तान्यूनाधिकावा संभवति। एवं च कुलाकार्यतिरापेक्ष् ३२७
याकश्चित्तुस्वख्यापि। आगोरहागतो। कश्चित्तेन विचिदान्ह लेख्यधतो। कश्चिदायत्तां
। यदाह। गम्यमन्यतो निवारयितुकामा सक्तमन्यस्यामपहर्तुकामा पचान्यां।

वाऽस्नतो वियुयुक्षमाणा गम्यसंसर्गादात्मनस्थानं वृद्धिमायतिमन्ति गम्यतां वम
न्यमाना अनर्थप्रतीकारं वा साहाय्यमेनं कारयितुकामा सक्तस्य व्यलीकार्थिनी दु
र्वापकारमकृतमिव पश्यंति केवलक्रीत्यार्थिना कल्याणबुद्धिरक्ष्यमपेक्षानंग
च्छीयात्। सूत्रं गम्यतामिति। अन्यत इति। अन्यस्या नायिकातः निवारयितुकामा
मान्यत्र हासीदिति अपहर्तुकामा। तद्वेषिण्यां सक्तं त्यक्ष्यामीति आन्तत इति। अ
न्यस्या नायिकातः निवारयितुकामा मान्यत्र ह्रासीदिति अपहर्तुकामा। तद्वे
षिण्यां सक्तं त्यक्ष्यामी मीति आन्तत इति गम्यसंबंधिनो आमात् वियुयुक्षमा
णा वियोक्तुमिच्छती अगम्यसंसर्गादिति। येन गम्येन सह संसर्गः तस्मात् स्थानं
जनसंसदि। विशिष्टदेशावस्थानं मन्यमाना वृद्धिं प्रकृष्टाख्यां आज्ञातिशयं

पतिंप्रजावंतंअभिगम्यतामन्येषानाथिकामभिगमनीयत्वं।अनर्थप्रतिकारेवेतिअन
र्थप्रतिकर्त्तुंसहायमेनंकर्त्तुकामासक्तस्यवेति।यत्तस्यासक्तोअन्योवर्त्तमानःस्वे
नयःपूर्वंकृतउपकारः।सस्वस्थत्वादकृतमिवपश्यंतितस्याअतीतस्यव्यली
कार्थिनी।अपराधंकर्त्तुकामाअस्यामपिगृह्णीयात्।येनायमपराद्धमन्येतिशा
कःस्यजाति।केवलप्रीत्यर्थिनीचेतिप्रीत्यैवाकेवलयाअर्थिनीमार्थैःकल्याण
बुद्धिरित्यविसंवादकाल्अयमनर्थप्रतीकारोकेत्युक्तमत्रविशेषमाह।आय
त्यर्थिनी।विनि।यदाआयातिर्महतीस्यादनर्थश्चनमहान्प्रतिकर्त्तव्यःनदा
नैवप्रतिगृह्णीयात्।प्रत्यक्षमेवन्यतःप्रतिसंख्यास्यामीतिगमिष्यतीतद्गुरे ३२८
योज्यते।नाशयिष्य– तिअंकुशान्तरुत्तराध्य...हो।अस्याग।मिष्यति।दवा

मी।पितावास्थानभ्रंशोवासारविष्यतिलक्षचित्रावास्यतिनैनयमानानदात्मेनतस्मात्स्वा
तमिच्छेत्।सत्रं।तत्प्रत्यक्षमेनं।तत्कालेततोक्षानंगृहीतान्।अन्यतःप्रतिसंख्यास्याम्।मि
तस्याधिकत्वात्त्यागमिष्यति।दारैर्योधितेगतःकृतदारपरिग्रहोवा।कथंदास्यति
।नाशयिष्यत्यनाथांतु।सकायान्त्।नस्यपरवस्यप्रापत्वात्।अंकुशान्तरुत्तिय
मद्द्यत्उत्तराध्यायकृतुपरिकःअस्योद्वीति।गमास्थेकर्माणिअगमिष्यतिनदायम
स्वतंत्रः।कथंदास्यति।स्वमापितावाअंकुशान्तरतस्थानभ्रमशोवेतियस्मिन्स्थाने
अस्याधिपत्यंतस्माद्विच्युति।चलम्चित्रोवाप्रतिज्ञायापिनदास्यति।तदानुति।
तदानीप्रतितानमीश्वरेणप्रतिग्रहलप्स्यते।अधिकरणंस्थानेवाप्राप्स्यतेइ
तिकालोस्यवावाहनोमस्याग।मिष्यामि।स्वक्षत– –वासस्यमस्यपकृतो।कृत

मास्मिन्नूनस्यतिनित्यमविसंवादकोवेवायत्यातिछेल् सूत्रं प्रतितृष्णं सख्यनद्र
ति -- त्यक्तेशेनउपक्षच्चार्थे दास्यति। अधिकरणेमद्रूपाटलादिकं स्थानंयत्रा
पिंधिपत्यं करिष्यति। वृत्तिकामोवैतिसेव -- जीवनकाक्षः। अस्मासत्रोराजकु
लेविलंबस्यवर्त्तमानत्वात्। वाहनंयानपात्रमागमिष्यतिवाणिज्यधर्मेस्थित
त्वात्। छत्रपत्रंवाद्रव्यन्नूतं। स्वराष्ट्रादिस्वस्वमस्यप्रकृतिः। इतमस्मिन्नूनन
स्यति। कृषिवृत्तित्वात्। ततश्चपद्मंसख्यंदास्यति। इतमस्मिन्ननपश्यति।
अजिगमतांनति। फलंकनकत्वात्। नित्यमविसंवादकोवाप्रतिज्ञाया। वन्नयं ३२९
दास्यति। आपत्यामित्यागतनकालेपरिग्रहकथ्यंवाचरेव। तत्रार्थस्यल
प्स्यमानत्वात्। नवंतिचात्रश्लोकाः। इत्यधिगतवृत्तांश्चक्लेशेनाजितवृत्ता

तरजवक्षजननिष्ठुरानिति। योराजदुष्टानिष्ठुराः। क्रूरायेषांनाकरणीयमपिकि
यदित्यर्थः। प्रायशस्तेभ्योनर्थसंनवात्। तेषांतांहिउपादानमित्यर्थः। अनर्थो
वतर्जनियेषांगमनेत्वरयत्नथा। प्रयत्नेनैवताव्रुगत्वासापदेशमुपक्रमेत्। अन
र्थइतियान्त्यक्त्वाअन्यस्मादनर्थोभिगम्यचाम्युदयः। नानुभवप्रयोजनत्वात्। प्रय
त्नेनापितानृत्ह्यप्रुपगम्यसापदेशमुपक्रमतेइति। यत्किंचित्मिश्रीकृत्यामभि
गच्छंतमभिगच्छेदित्यर्थः। वृत्ताद्यभावादात्मनेपदंनभवति। येष्वर्थएवप्रयोजनं
तांनात्। प्रसन्नायेप्रयच्छंतिस्वल्पेपिगणितेवसुस्कृत्रदानमहोत्साहाइतावाद
वेयखेरपिवाये। सूत्रं। प्रसन्नाइति। महानुत्साहोयेषांमिति। महत्वंबोत्साह
स्यत्रोयदिभिः। तेहिनष्टाः स्वल्पेपिवेश्याविषयेप्रभूतंद्रव्यंप्रयच्छंति। तस्मा

त्वानुगच्छेत्। स्वैरपि द्रव्यैरुपचारश्च रुणेः॥ इति लाभविशेषतः सप्तपंचाशं प्रकर
णं॥ इति वैशिके षष्ठेधिकरणे पंचमोध्यायः॥ आदितस्त्रयस्त्रिंशः॥ शास्त्रकारए
व प्रकरणसंबंधमाह। अथ निवार्यमाणानानर्थान्-- मुद्भवंति अनुबंधाः सं
शयश्च॥१॥ सूत्रं॥ अथमिति। लाभविशेषान् अनंतरोक्तान् आचार्यमाणान् सा
धमान्-- अपरिग्रहत्यावेश्याया अनर्थादित्यर्थः॥ दिहसाः अनद्भवंतीति।
अनुलक्षणेनेत्यनेकर्मप्रवचनीयत्वे अर्था- निद्वितीया। अर्थान् साध्य
मानानां लक्ष्मीकृत्यामथनिर्मिषिस्तदेकत्वः उत्पद्यंते सत्र परा अर्था एवोत्प ३३०
द्यंते तदा निरनुबंधार्थः परः॥ परार्थबाधिलानार्थस्तदानिरनुबंधार्थः प
रः॥ अनुबंधाइत्यर्थानर्थयोः॥ संशयाश्च एतयोरेवोत्पद्यंते तस्मात्तेनो

पादानार्थोविवादोस्युक्तः इत्यर्थानुबंधः संशयविचार उत्पद्यंते तत्रार्थः तदनु
बंधाश्चोपादेया एवा न संशयाश्च केषांचित् प्रवृत्ते योजनर्थास्तदनुबंधास्त
संशयाश्च तेषामनुपादेयत्वात् उत्पत्तिकारणान्याह। तेबुद्धिदौर्बल्यादतिरागा
त्यत्यभिमानादतिदंभादत्यार्जवादतिविश्वासादतिक्रोधात्प्रमादात्साहसा
द्दैवयोगाश्चस्युः। सूत्रं॥ तेति अनर्थादयः बुद्धिदौर्बल्यादितिफलासमृद्धतला
भिनिवेशयोगाविकल्पं बुद्धिदौर्बल्यं रागः शक्तिः अभिमानोहंकारः। दंभश्छ
द्म आर्जवं ऋजुता॥ विश्वासो विश्रंभः। क्रोधः कोपः। एते कार्यवशात् युक्तितः प्र
युज्यमानानैव दोषाय। आधिक्यात्तु दोषायेवाइत्यतिशब्दं नाह। प्रमादो
योन्यत्रव्यासंगः। सूत्रं॥ अविमृश्यकारित्वं। एतत्र वधामानुषनिमित्तं दैव

वा०सू०जा०
३२१

योगादिति। दैवमदृष्टं कर्म शुभं चाशुभं संज्ञं च। तेन दैवयोगादित्यर्थः। तेषां फलं
कृतस्य व्ययस्य निःफलत्वं अनापत्तिः। आगमिष्योऽर्थस्य निवर्त्तनं। आप्तस्य निः
क्रमणं पुरुषस्य प्राप्तिः। गम्यता शरीरस्य प्रघातः। केशानां छेदनं पातनमंगा
वैकल्यापत्तिः। तस्मात् आनादित एव परिजिहीर्षेत्। अर्थमूलायिष्टं चापक्षेनेत।
सूत्रं। तेषां वृद्धिदौर्बल्यादीनां। अथवा एषामिति। अनर्थानां सानुबंधानां त
संशयानां च फलमिति परिणामः। अनर्थवेदावित्यादिरेणामहद्रूपेण संशयमा
नत्वात्। अनर्थसंशयानामपि फलं व्ययस्येति गम्यामिगमनाय कृतस्य अ ३२१
नायतिः। प्रभावस्थानिः। रागमिष्यत इति। अ। धिकृतेऽपि व्ययेक्षमाणस्य
निवर्त्तनमिति। बोद्धव्यं। आप्तस्येति। आप्तस्येत्यर्थः। निःक्रमणमन्येन गृह्य

माणत्वात् पुरुषस्येति द्विरुक्तस्य गम्यता परिचेयता। शरीरस्य प्रघाता प्रा
णैर्वियोगः। एषां एणां छेदनं खवनं पातनं वधनाडनं। अंगावैकल्यं करणेनि
सा विच्छेदः। तानृद्धिदौर्बल्यादीन् आदित एव परिहर्तुमिच्छेत्। यावदर्थहे
तूनुपायान्प्रयुंक्ते। अन्यथा ह्यर्थं बाधित्वा अनर्थोऽपि स्यात् कारणानां संनिहित
त्वात्। अर्थः पृथिव्यामिति। अर्थबद्धत्वात्। अनर्थहेतुरुपेक्ष्यते। तत्र ह्यर्थहेतुनामे
वोपायानां व्याकुल्यात् दृष्टानां निरनुबंधात् विचारं प्रेत्य मात। अर्थो धर्मः काम इत्य
र्थत्रिवर्गः। किं अनर्थोऽधर्मो द्वेष इति अनर्थत्रिवर्गः। सूत्रं। अनर्थ इति अर्थाद्विव
गत्यर्थ इति कृत्वा तद्विरुद्धोऽर्थः त्रिवर्गः। ततश्चार्थानर्थानुबंधसंशयविचाराः
इत्यस्मिन्सूत्रे धर्माधर्मयोः कामद्वेषयोः परिसंख्या ह्यर्थः सिद्धः अनेन निरनुबं

वा०सू०जा०
२३२

धपरूउक्तोवेदितव्यः॥ तेषु चर्यमाणेष्वन्यस्यापि निष्पत्तेरनुबंधः॥ तेऽत्यर्थाद्विषु
य--साध्यमानो मानेऽनेनेषु अन्यस्याबाधीति न केवलं साध्यमानस्य अन्यस्यापि इ
ति॥ सजातीयस्य विजातीयस्य वा पंचानामन्या--मस्येति॥ असंप्राप्तौ संदि
ग्धायां स्यात्‌ वा न वेति यो विकल्पः॥ स संशयः॥ एकस्यैव भावाभावाभ्यां सं
शय्यमानत्वात्‌॥ इदं वा स्यादिदं चेति संकीर्णः॥ इदं वा स्यादिदं वेति संकीर्णसंश
यः॥ द्वयोरन्यतरोत्पत्त्यादिकल्पस्य संकीर्यमानत्वात्‌॥ एकस्मिन् क्रियमाणे का
र्यकार्यद्वयोत्पत्तिरूनयतो योगः॥ एकस्मिन्कार्ये इति॥ अर्थादिसाधने क्रिय २३२
माणे द्वयस्येत्यर्थादीनां पञ्चानामन्यतमस्य सजातीयस्य विजातीयस्य वा॥ द्व
यस्योत्पत्तिरूनयतो योग इति उभाभ्यां संबद्धद्वयस्योत्पत्तिः॥ समंतादुत्पत्तिः सम

तादुत्पत्तिः समंततो योग इति समंतादिति॥ एकस्मिन् क्रियमाणे बहूनामर्थादीना
मुत्पत्तिः समंततो योगः॥ अस्य योगद्वयस्य निरनुबंधा परूएवं वर्गोऽर्थोऽनर्थश्च तयोः
स्वरूपतो परिज्ञाने कथमुदाहरणमित्याह॥ विचारितरूपोऽर्थस्त्रिवर्गः॥ सूत्रं॥ विचा
रितरूप इति॥ त्रिवर्गप्रतिपत्तौ निरूपतस्वभाव इत्यर्थः॥ त-रु…लादनर्थोऽपि वि
चारितरूप इत्याह॥ तद्विपरीतरूपोऽनर्थत्रिवर्गः॥ सूत्रं॥ तद्विपरीतो नर्थत्रिवर्ग इ
ति त--नर्थयोस्त्रिवर्गयोरर्थानर्थविल्पबाधित्वात्‌॥ यस्योत्तमस्य संप्राप्तौ
प्रत्यक्षतोऽर्थलाभो यद्ग्रहणाय तं मायति रागमः--नीयतं चान्येषां स्यात्‌ सो
र्थोऽर्थानुबंधः॥ सूत्रं॥ यस्येति उत्तमादिभेदात्त्रिविधो नायको व्याख्यातः॥ तत्र
यः समस्तगुणैर्युक्तस्योत्तमगुणस्याभिगमने प्रत्यक्षयोऽर्थलाभ इति॥ ततए

बप्रत्ययात् तदानीमर्थलाभः ग्रहणीयत्वमिति। लोकग्राह्यत्वं उपादेयत्वं आयतिप्र
भावः आगमत्वात् क्षमीनां प्रार्थनीयत्वं गम्यादीनां सोर्थ इति योसौ तदात्वे लाभः अ
र्थानुबंध इति ग्रहणीयत्वादिभिरर्थैरनुबंधो यस्य अयं सजातीयानुबंधः। लाभ
मात्रे कस्यचिदन्यस्य गमनमर्थो निरनुबंधो यस्य अयं सजातीयानुबंधः। लाभ
मात्रे कस्यचित् कृत्रं। लाभमात्र इति। तदात्वे यो लाभः तन्मात्रमेव निमित्तं कस्यचिदि
ति यो लोके दोषे गुणे वा निविबध्नीति। तस्यान्निगमनमात्रो र्थो निरनुबंधः। ग्रहणी
यत्वमिति। लोकतत्वाधना बाद्। अन्यथा प्रतिग्रहे शक्तादायाति छेदनमात्रस्या ३२३
र्थस्य निःक्रमणं लोकविद्विष्टस्य वानीचस्य वा गमनमायतिघ्नमर्थो निरनुबंधः।
शक्तिकादिति। यः शक्तो निःसारत्वात्। अन्यदीयमर्थमपहृत्य प्रयच्छति। तस्या

र्थस्य प्रतिग्रहे आयतिच्छेदनं प्रजावात्। निः दस्युना सह तिष्ठतीति अर्थस्येति इ
दपि तस्य निष्क्रमणं वात्र दुर्व्यमिति। तावकेन गृह्यमानत्वात्। लोकविद्विष्टस्य वा
चौर्यमकुर्वतोपि नीचस्य वा जातिन्यूनस्य गमनमायतिघ्नमिति प्रजावत्वं इति।
अत्रार्थे निरर्थानुबंधत्वं तदात्वे लाभः स्यादायतिच्छेदानर्थानुबंधत्वात्। अयं विरुद्धानु
बंधः। कदर्यस्येत्येतो कमानिनः ठतघ्नस्य वान्तिसंधानशीलस्य स्वैरं पिवायेत्तथा
राधनमानत निष्फलं सोनर्थो निरनुबंधः। तत्र कदर्यस्येति। आत्मानं तत्वां अपी
डयित्वा यो र्थान् संचिनोति। सुभगमानिन इति। असुभगसन्नात्मानं सुभगं यो
मन्यते — प्रयच्छति। यः सुदुर्भगः सुभगमानी स केवलार्थोगिभ्य उक्तः। कृतघ्नस्य
वा शाठ्यः पूर्वापिकृत्यासवक्रियोज्य — तिसंधानशीलस्य छलेन संधानपरस्य त

थाराधनमिति यथा स्वैरिण्यायेरन्निमम नं निःफलाय यथानुरंजनमयं — निष्फलसो
नर्थ इति यः कृतो यया निरनुबंधः । अथ निरर्थानुबंधः । सूत्रं । तस्यैवेति । कदर्यादि
विशेषमाह । राजवल्लभं जस्येति क्रोधप्रभावाधिकस्येति दोषत्रयमात्राधिक्यं तथै
वराधानमिति । यथा स्वैरिण्यायेरन्निमम नं निःफलाय यथानुरंजनमयं — निष्फलसो
नर्थ इति यः कृतो यया निरनुबंधः । कदर्यादीनामदातृत्वात् निष्कासनं वा दत्तं दो
षकरं तेषां हि निष्कासिता दोषत्रययुक्तत्वात् पारुष्यशरीरप्रघातादीनां नवमिकुर्युः
दृत्यनर्थो निरर्थानुबंधः । अयं सजातीयानुबंधः । एवं धर्मानिपि धर्मकामयोरनुबंधा २३४
नुयोजयेत् । एवमन्यानपि धर्मकामयोरनुबंधानुयोजयेत् । परस्परेण च युक्त्या सं
क्रियेदित्यनुबंधाः । सूत्रं । एवं धर्मकामयोरपीति तत्र ब्राह्मणस्य गृहस्थस्यानुर

क्तस्य मुमुक्षोर्गमनात् प्राणसंरक्षणं कुटुंबसंधारणं गार्हस्थ्यमप्रवर्तनं चाधर्मो
धर्मानुबंधः । काममात्रं चेदधर्मो निरनुबंधः । तत्रैव कृतस्नानभोजनस्य ब्राह्मण
स्य — — — वायात् धातुरूपमूल्यलोधमेश्विधर्मानुबंधः । अनिष्ट्रेतस्य हादिमृग
स्य गमनं कामो वेशानुबंधः रतिश्चानुबंधः । एषु विजातीयविरुद्धाभ्यामनुबंधा
द्वादशापरस्परेयुक्तो तिविरुद्ध इत्यकारोषाणां विजातीयानामन्योन्ययोगादित्य
र्थः । तत्रार्थो धर्माधर्मकामद्वेषैः प्रत्येकमनुबंधश्चतुर्धा । तथा अनर्थोपि धर्माधि
कामद्वेषैः प्रत्येकमनुबंधश्चतुर्विधः । तथा धर्मोपि कायनिर्थधर्मैः प्रत्येकमनुबं
धश्चतुर्बंधः । तथा द्वेषोपि । इत्थं चतुर्विंशतिसंकीर्णानुबंधाः । अद्य संशयमधिकृ
त्याह । परितोपि दास्यति नवेत्यर्थसंशयः । निष्पीडितार्थमफलमुत्सृजंत्या अर्थ

मभ्यर्जमानायाधर्मस्यान्नवेतिधर्मसंशयः।अभिप्रेतमुपलभ्यपरिचारकमन्यंवाक्षु
द्रंदत्वाकामस्यनवेतिकामसंशयः।अत्यंतनिःफलःशक्तिःपरित्यक्तःपितृलोकंया
यात्।तत्राधर्मस्यान्नवेत्यधर्मसंशयः।रागस्यापिविवक्षायामभिप्रेतमर्थमुपल
भ्यविरागस्यान्नवेतिद्वेषसंशयः।इतिशुद्धसंशयाः।आगंतवोऽविदितशीलस्य
वल्लभसंश्रयस्यप्रभविष्णोर्वासमुपस्थितमाराधनमथोनिर्थइतिसंशयः।श्रो
त्रियस्यब्रह्मचारिणोदीक्षितस्यव्रतिनोलिंगिनोवामांदृष्ट्वायातरागस्यमुमुर्षो
।मित्रवाक्यादानृशंस्याच्चगमनंधर्मोऽधर्मइतिसंशयः।लौकिकैर्लोकाद्विवाक्ष ३३५
तप्रत्ययाद्गुणेष्वगुणेष्वानित्यनपेक्षगमनंकामद्वेषइतिसंशयः।संकरेचपर
स्परेणेतिसंकीर्णसंशयाः।परितोषितोपीतायदितदातेनदद्यातिसुरतोप

चारेणपरितोषितोपिदास्यति।तत्राज्ञानशीलत्वाद्दद्यान्नवेत्यर्थसंशयः।उत्सृज्यत्यो
इति।कामुकेष्योगान्निरस्य।अर्थार्जनेवेश्याभ्याधर्मः।तथाहि।यथास्ववृत्तिधर्मइत्या
चार्यः।तत्रार्थमभ्यर्जमानायामित्यपीडितार्थस्याभ्यर्जनमपिकिंधर्मोनवेतिसं
शयः।अभिप्रेतमपिकंचिरंनायकंपरिचारकमात्मीयंक्षुद्रंनिकृष्टंगत्वात्तयोर
नभिप्रेतत्वात्।अज्ञातकामत्वाच्चकामः—नवेतिसंशयः।अनभिगतइति।अ
नैरभिगंतुमिष्टस्तुच्छत्वात्प्रत्यारब्धातः।सहिराजकुलेलब्धप्रभावत्वात्।अन
र्थंकरिष्यतिनवेतिसंशयः।शक्तइति।अनुरक्तोऽभिगंतुमिष्टः।परित्यक्तोनिःफ
लत्वात्।पितृलोकंयायादिति।अवस्थांतरप्राप्तोयमलोकंयायादितिसंभाव्य
ते।अत्रेतिपरित्यागेऽधर्मस्यान्नवेतिसंशयः।रागस्यापिविवक्षायामिति।

बा॰ह॰ना॰
२३६

कामोनन्नविध्यतीतिन विवक्षितं। रोगेणपिड्यमानत्वात्। अन्निष्टेनोपिनास्ति।य
दायस्मा। श्रेत्यस्यादित्यात्। अन्निष्टत्वमनुपपन्नेति। केवलमेववर्तमानायांवि
द्वेषःस्यान्नवेतिसंशयः। श्रुद्धसंशयाइति। एकस्यैवभावाभावाभ्यांसंशयमानत्वा
त्। तथेत्यानंतर्यसंकीर्णनिर्दिश्यते। अद्यानंतरं हिसंकीर्णस्योद्दिष्टत्वात्। इदंवा
स्यादिदंवेति। संकीर्णइति। सचविरुद्धाविरुद्धाभ्यां। तत्रार्थधर्माधिकृत्यात्। आ
गतोरिति। कृतश्चिदागतस्यागमनेऽत्र विदितशीलत्वादर्थेन तथावेत्तिसंशयः।
अत्रप्रत्ययस्यवाऽर्थित्तयासमुपस्थितत्वादर्थः। वध्वजसंश्रयत्वात्। प्रणवि २३६
स्मृतावृणः। अनर्थइतिकारणद्वयस्यनिधानासंशयः। श्रोत्रियास्यातिमहत्स्व
स्यापिक्रियावंतः अत्मनारिणइति। प्रथमाश्रमस्याव्रतिनइति। क्रियंतकालं

गृहीतयाराकादिव्रतस्यालिंगालिंगिनइति। गेतादेः मुमुक्षोरितिमत्तुमिक्षोः कामस्याव
स्थांतरप्राप्तत्वात्। मित्रवाक्यत्वादिति। श्रोत्रियादीनांमित्रस्यान्यर्थनावचनात्। आ
नृशंस्यात्। कारुण्यात्। अन्निगमनेधर्मोत्रधर्मइतिमांसूत्रायत्यागइति। धर्मनिय
मत्वंश्चः स्मृष्यइत्याधर्मः। तदुभयमपिकस्मान्नभवतीतिचेन्नान्यतरस्यावलीयस
त्पादनात्। अकृतप्रत्ययादिति। अकृतनिश्चयात्। लोकात्। किमयंगुणवान्नवेति।
स्वयमनपरो। निश्चित्यकेवलंलोकप्रमादात्। गुणवानित्यनिगमनादनिगम
नादनिशरणे किलतः कामोद्वेषोवेतिसंशयः। इतिविरुद्धसंकीर्णलियः। विरु
द्धमधिकृत्याबयत्रपरस्यानिगमनेत्यर्थः। शक्ताद्यसंदर्यतिः। सउभयतोर्थः।
यत्रेतिय। स्मिन्नुभयतोलोयोकेपरस्येत्यपूर्वस्यान्नरत्राप्यधिकृतंवेदितव्यं।

बा॰रू॰भा॰
३३१

अनिगमनेत्यर्थः। परस्मादेव शंकाश्चेत्वनुरक्तादनिगमनो संतुष्यतीति सर्वद्धमानाद
र्थः। समाच्छदनेनास्यासंप्रयोग इति स्यादुयादशाति। स इत्युनयतोयोगः उनया
तार्थो नाम अन्यत्र परस्मिन्क्रियमाणे कार्यद्वयस्योक्तेः। त्यक्तनयतोयोग इति। मू
लस्तत्रार्थो योज्यः। यत्र स्वारन्वयेन निःफलमनिगमनं। शंकाश्चामशाङ्क्ति प्रत्या
दानं। सउन्नयतोनर्थः। यस्मिन्ननयोतोयोगेस्वेन व्ययेनानिगमनं परस्योतिवर्त्त
तेनिःफलमित्यर्थः। शक्ताश्चानुरक्तादनिगमनं विन्नक्ते परिणामेन योज्यात्र म
शादिति। कदाचिदर्थयुक्तात्क्रुद्धादविन्नप्रत्यादानमिति। तेनैव दत्तं प्रलीयमा ३३१
दीयमानमर्थं तेनिःक्रमणात्। सउन्नयातोनर्थः उन्नयतोनर्थो नाम उन्नयतो
गम्यस्यानिन्नविषयत्वात्। निरनुबंधपक्षे तन्न विः संशयत्रास्तिचेत्याह। यत्रा

निगमने थोनिविष्यतिनवेत्याशंकाशाक्तोपि संतुष्यद्दास्यति न वेति स उन्नयतोर्थ
संशयः। सूत्रंप्यत्रेति यस्मिन्नुन्नयतो योगे अनिगमन इति परस्य नाविष्यतीत्या
शंकान निश्चयः। शक्तश्चानिगमने संतुष्यत्सिप्रदुयाद्दास्यति न वेति स उन्नयतोर्थ
संशयो नाम। यत्रानिगमने व्ययवानिति पूर्वो विरुद्धः क्रोधापदशार्थं करिष्यति न
वेति संशयः। सूत्रं। यत्रेत्युन्नयतोयोगे व्ययवतीति व्ययरूला परस्यापि गमनं
यतः पूर्वइति पूर्वसंसृष्टः विरुद्धपरस्यैव क्रोधादिति। स्वेन व्ययेनायमनयानि
गम्यत इति तद्वारेण क्रोधान्ममोपकारं करिष्यतीति न वेति संशयः। शक्तयो वया
श्रितोदत्तं प्रत्यादास्यति न वेति। स उन्नयतोनर्थसंशय इति उद्धांसिके उन्नयतो
योगः। शक्तश्च द्वाक्षयाच्चिदर्थयुक्तयामश्रितो मम नोदत्तं प्रत्यादास्यति न वेति

बा॰ सू॰ जा॰
२-८

संशयः। स उभयतोयोगोऽनर्थसंशयो नाम बाभ्रवीयास्तु यत्राभिगमनेऽर्थोऽनभिगम
नेऽन्यश्चानर्थः स उभयतोऽर्थः। यत्राभिगमने च निष्क्रमो व्ययोऽनभिगमने चानि
प्रतीकारोऽनर्थः। स उभयतोऽनर्थः। यत्राभिगमने नित्यं यो दास्यति न वेति संशयो
नाभिगमने शक्तो दास्यति न वेति स उभयतोऽनर्थसंशयः। एतेषामेव व्यतिरेके
नान्यतोऽर्थोऽन्यतोऽनर्थसंशयोऽन्यतोऽनर्थोऽन्यतरतोऽर्थोऽनर्थसंशयः। इति षट्
संकीर्णयोगाः। बाभ्रवीयास्तु उभयतो योऽवाप्यन्ते। तत्र यत्रेत्युभयतोयोगेऽभि
गमेऽर्थश्चाशक्यादित्यनभिगतान्न शक्यादित्यर्थः। यः क्रोधशीलो नाभिगत एव प्र २२८
यच्छति। यथोक्तं। प्राक्क्राक्षं। वसि-रीसनाथा प्रत्याता प्रजेत्। इति एवंविधि
नरं तन्निम्नन्यतराभिगमने अन्यतरस्मादर्थः। इयत्वकत्वाभिगमने उभ

यस्मादर्थो न तत्र स एवात्र मूलसूत्रार्थः। यत्रेत्युभयतोयोगेऽभिगमन इति प
रस्यानिष्कलो व्यय इति। अनर्थाभिगमने चाशक्यादित्यनुवर्तते। यः परानभिग
मनेन शक्तो जातामर्शः तस्मात्प्रतीकारोऽनर्थो यदि तु न प्रत्यादानं स उभयतोऽनर्थो
नाम। यत्रेत्युभयतोयोगेऽभिगमने परस्यानिष्टव्यय इति। नाव्यय इति। अनभिग
मने शक्त इति। विनाऽनभिगमने दास्यति न वेति। तस्य वासित्वं नानिश्चितं स उभ
यतोसंशयो नाम। यत्रेत्युभयतोयोगेऽभिगमने परस्य पूर्वं विरुद्धः। प्राप्स्यते म
यातद्वारेणायमापयकरिष्यति न वेति संशयः। अनभिगमने वशक्त इति वर्त
ते। क्रोधादनर्थं करिष्यति न वेति संशयः। अभिगमने तु पराधेऽनभिगमने
तदीयामर्शस्य अनिश्चितत्वात्। उभयतोऽनर्थसंशयो नाम। एतच्चलास्त्र उभ

बा॰ हू॰ ला॰
३३९

यतोयोगास्तत्रनिहृयेपिष्टद्वउक्ताः।संकीर्णमाह।एतेषांव्यतिरेकइति।सजातीयं
त्वलक्षणेषाणांपरस्परसंकीर्णेषिटूसंकीर्णयोगा।यदाह।अन्यतइति।यत्रपर
स्यान्निगमनेर्थइति।एकतोयोर्थःशंकाद्यमत्रितिताल्।विन्नप्रत्यादानमिंतिअन्य
तोनर्थोयं।उभयतोयोगोअर्थनिर्थरूपः।अन्यतोर्थइतिदुर्बल।शंकःसंके
हर्षाद्वास्यातिानवेत्यन्यतोर्थसंशयः।अयमर्थार्थसंशयरूपः।यत्रपरस्यत्वेव्य
येनानिःफलमन्निगमनमित्यन्यतोनर्थः।शंकःसंहर्षाद्वास्यत्तिअनवेतिअ
न्यतोनर्थसंशयरूपः।अन्यतोर्थइतिदुर्बल।शंकोमात्रितिंदत्तंप्रत्यादास्य ३३९
त्तिनवेति।अन्यतोनर्थसंशयः।अयमर्थसंशयरूपः।एवंवात्रव्यदत्तनिपि
योज्या।तेषुसहायैःसहविमृश्ययतोर्थःप्रेय्येष्टोअर्थसंश्रयोगुरुनर्थप्रश

वाततःप्रवर्त्तेता।सूत्रं।तोष्वितिःदत्तनिहृयेपिकुडुपुसंकीर्णेषुचसहायैःसुबुद्धिःप
न्नइतियंगम्यमाश्रित्यअर्थन्द्यूयिहइत्यर्थबहुलोयोर्थसंशयोनेतरःगुरुनेर
र्थप्रशमोवा।यतःअर्थाद्विमहतोअनर्थस्यप्रतिकार्यस्यगुरुत्वात्।ततइति
तंस--रूत्यप्रवर्त्तेता।अनवेयैत्यर्थयुक्तोदाहरण।यदाह।वत्रपरस्याद्विय
त्वात्अन्निगमनेधर्मःशंकाद्यानुरागात्।यत्रसुमुर्षोःसउभयतोधर्मः।य
त्रब्रह्मचारिणोऽन्निगमनेअधर्मःशंकाद्व्रतलोपादनिष्टतःसउभयतोध
र्मः।यत्र—चारिन्निगमनेअधर्मःशंका।परस्यनिद्रूपत्वान्निगमनेधर्मोग्निनमी
त्याशंक्याह।शंकास्थूनिर्व्वीर्डितार्थत्वादप्रयच्छतोधर्मोनिवेति।शंकश्चव्रत
लोपादिप्सतोधर्मोनिवेति।सउभयतोधर्मसंशयइति।यत्रपरस्यान्निवेतस्या

।निगमने कामः शंकाश्चाभिप्रेतान स उभयतः कामः। यत्र परस्याभिप्रेतस्य विरागः
शंकाश्चानभिप्रेतान् स उभयतो कामः। यत्र परस्यानभिप्रेतस्य विरागः शंकाश्चा
नभिप्रेतान् स उभयतो द्वेषः। यत्र यस्यानभिप्रेतस्य विरागः शंकाश्चानभिप्रेता
न् स उभयतो द्वेषः। यत्र परस्या विदितशीलस्य गमने कामो भविष्यतीत्यासं
शा शंकाश्च निकृष्टत्वात् कामो न वेति स उभयतः कामसंशयः। यत्र परस्याभि
गमने रागो यन्नयनं विवक्षायां विरागः स्यात् न वेति संशयः शंकाश्च तथैव वि
रागः स्यान्न वेति स उभयतोत्र संशयः। इत्यौद्दालकिरष्टाउभयत्र योगाः। तथै ३४०
व गमनाभ्यां बाभ्रवीयनेषु दाहरेत्। संक्लिश्येच्च। धर्मकामाव्यतौ रेवं प्रकारे
रेकैकशः। संक्लिश्येच्च। परस्परेण व्यतिषंजयेच्च। इत्युभयतो योगाः। संक्लि

श्च। परस्परेण व्यतिषंजयेच्च। इत्युभयतो योगाः। संक्लिश्येच्च परस्परेणेति। सजाती
यास्त्यक्ता तथान्यतो धर्मश्चान्यतो धर्मेण। धर्मसंशयो नाधर्मसंशयेन। संकीर्ण
।स्त्रिविधः। तथान्यतो धर्माधर्मत्यामन्यतो धर्मसंशयो वा। अन्यतो धर्मसंशये
।स्त्रिविधः। तथान्यतो धर्माधर्मन्यामन्यतो धर्मसंशयो वा। अन्यतो धर्मसंशये
नसंकीर्णस्त्रियः इति षट्संकीर्णाः औद्दालकिबाभ्रव्यस्य च। एवमन्यतः कामो
अन्यतो द्वेषेन कामसंशयेन च संकीर्णस्त्रिविधः। तथान्यतो द्वेषोन्यतः काम
संशयान्यामन्यतः कामसंशयश्च। अन्यतो द्वेषसंशयेन द्विसंकीर्णस्त्रियः। ष
ऊौद्दालकिबाभ्रव्यस्य। चइत्यायिसंशये विमृश्यतो धर्मं न्यायिष्टः। कामन्न
यिष्टः नसंशयगुरुधर्मद्वेषप्रशमश्च। ततः प्रवर्तेत उभयतो धर्मद्विषः नसं
शयश्चेति योज्यं। व्यतिषंजयेच्चेति। अयदीनां विरुद्धत्वं। त्यक्त्वाशेषारूप

बा० स्ट० नो०
३४१

रस्परतः संश्लेषयेदित्यर्थः। तत्रान्यतोधर्माधर्मकामद्वेषैः तत्संशयैश्च संयोजितोऽष्ट
प्रकारः। तथानर्थोऽनर्थसंशयोऽर्थानर्थसंशयश्च समुदायेन द्वात्रिंशद्भवति।
एवमन्यतोधर्मोऽन्यतोऽर्थानर्थकामद्वेषैस्तत्संशयैश्च संयोजितोऽष्टप्रकारः।
तथाधर्मोऽधर्मसंशयश्चेति द्वात्रिंशत्। एवमन्यतः कामोऽन्यतोऽनर्थानर्थधर्मा
धर्मैस्तत्संशयैश्च योजितोऽष्टप्रकारः। तथा द्वेषकामसंशयो द्वेषसंशयश्चेति द्वा
त्रिंशतः। समुदायेन षण्णवतिः। विपर्ययेणैतावंत एव। औद्दालिकेयास्तिषंगसं
योगानां च द्वानवतशतं। एवं बाभ्रवीयस्य तेषामपि सहायैर्विमृश्येत्यादियोज्यं ३४१
उक्ताउभयतोयोगास्त्रिविधाश्च शुद्धाः संकीर्णाश्च व्यतिषक्ताश्च समंततोयो
गं दर्शयितुं विशेषमाह। संभूय च विटाः परिगृह्णंतो कामसौख्यगोष्ठीपरि

ग्रहः सा तेषामितस्ततः संसृज्यमाना प्रत्येकं संहर्षमर्थान्निवर्तयेत्। अन्नसं
ताडिषुव मेदमममुंचामनोरथं संपादयिष्यति। तस्यागमयिष्यतीत्युहि
तेतिमात्रवाच्यत्। तेषां संघर्षजं निगमनेकार्याणि कुर्यात्। एकतोऽर्थः सर्व
तोऽर्थः सर्वतोऽनर्थः एकतोऽनर्थः उभयतोऽर्थः उभयतोऽनर्थ इति समंततो
योगाः। सूत्रं। संभूयेति एकीभूय ऋाव विश्वासत्वात्परिगृह्णंतो वित्तकं विटाः शा
पशयवर्द्धसमाचारत्वात् सा गोष्ठीपरिग्रह उच्यते योबहुभिरेकस्याः परिग्र
हः तेनानेकपरिग्रहतायाः समंततोयोगइति तामेवाधिकृत्याह। अनेकपरिहा
रात्। तेषामितस्ततः इत्यनेन कदाचिदेकेन द्वाभ्यां बहुभिर्वा संसृज्यमाना संख्य
कयतीस सहर्षमिति परस्परस्पर्धया तेषां संसृज्यमाना प्रत्येकमेकेकशोऽन्म

थीन्निवर्त्तयितारस्य। किारणमाह। अशनसनकादिष्विति। तेषु सर्वेषु विटा। सर्वेषु विटानां
कामदौर्बल्यं जायते। मनोरथमित्यभिप्रेतं वाचयेत्। सा हि निरतोऽर्थत्वात् दोशा
न्या व्यवस्थापयितुं संहर्षज इति स्यादुज्जनितेकार्यलिंगितिखो नानान्याह। एकतो
र्थमितियावद्भिः परिगृहीता। तेषामन्यतमस्यैकस्य द्वयोरन्यतरस्य शेषाविसर्ज
स्यादिति। न वस्माद्देकतोर्थस्तरूपे सर्वतइति सर्वेभ्योर्थ एकतोनर्थ सर्वतोनर्थ य
दोनोस्यादिति। उभयतोर्थ सर्वतोर्थमुभयतोनर्थं सर्वतोनर्थमिति। यदाऽर्द्ध
स्यादिति तदाऽर्द्धतोर्थमर्द्धतोनर्थमिति। समंततो योगाः त्रिविधाविन्नाः। अनि ३५२
न्नविषयत्वादनुबंधो नास्ति। संशयस्तु विद्यत इत्याह। अर्थसंशयमनर्थसंशा
यं पूर्ववद्योजयेत्। संक्षिप्तेन तथा धर्मका[illegible]वपि। इत्यनुबंधार्थानर्थसंशय

विचाराः। एवं विदितिए कतोर्थः सर्वतोनर्थसंशय इति तृतीयः। एकतोनर्थः सर्व
तोर्थसंशये त्यक्त्वर्थः। एकतोनर्थः सर्वतोनर्थसंशय इति पंचमः। एकतोर्थः
सर्वतोनर्थ इति षष्ठः। इति संकीर्णः षट् इति शुद्धाश्चत्वारः। एवं स्वजातीयत्यक्ता
संकीर्णाः षट्सूत्रे। ध्यतिसंचयश्चेति। अर्थादीनां शुद्धसंकीर्णभिन्नानां व्यतिषं
गे सद्भानक्रमस्तंभवति। एवमुभयतो इति च योजयेत्। संकर्षजं निर्गमनेका
र्याण्येत्यान्युक्तानि। यदा त्व संहर्षजमभिगमनं तदा तेषामेकाभिप्रायत्वात्
द्वादश समंततो योगाः। सर्वतोर्थः सर्वतोनर्थः। सर्वतोनर्थः। सर्वतोधर्मः स
र्वतोऽधर्मः। सर्वतः कामः सर्वतो द्वेषः। त एवं संशयिताः षडित्युक्ता अ
र्थानर्थानुबंधसंशयविचाराः। प्रवेशप्रयोजनमिदमधिकरणं। द्वेषस्य

कारणस्यशेषंनूतमाह।कुंभदासीपरिचारकाकुलटा।स्वैरिणीनटी।शिल्पका
रिकाप्रकाशविनष्टारूपाजीवागणिकाचेतिवेश्याविशेषाः।सूत्रं।कुंभदासीति।
कुंभग्रहणंनिकृष्टकर्मोपलक्षणं।लोकेसामान्यत्वेनयत्प्रसिद्धाःकुंभदासीग
णिकारूपाजीवाचेति।शेषाणामपिसामान्यत्वात्तत्रैवांतर्भावः।परिचारिका
याःस्वामिनंपरिचरति।तस्याश्चौपनिषदिकेविधिंवक्ष्यति।कुलटयापतिभ
यात्गृहांतरंगत्वाप्रछन्नमन्येनसंप्रयुज्यते।स्वैरिणीयापतिंतिरस्कृत्य
स्वगृहेन्यगृहेवासंप्रयुज्यते।नटीरंगयोषित्।शिल्पकारिकारजकतंतु ३४२
वायभार्याप्रकाशविनष्टायाजीवतिमृतेवापत्यौसंग्रहणधर्मेणगृहीताका
मचारंप्रवर्तते।एताःषट्रूपाजीवायामेवांतर्भवंति।विशेषःसंपद्यते।स

वसीचानुरूप्येणगम्याः।सहायास्तदुपरंजनमर्थागमोपायाः।निष्कासनंविशी
र्णप्रतिसंधानंलाभविशेषाःअनुबंधार्थानर्थसंशयविचारः॥ ॥इत्यरा
र्जुनभुजबलमल्लराजनारायणमहाराजाधिराजचौलुक्यचूडामणिश्रीम
द्वीसलदेवस्यभांडागारेश्रीवात्स्यायनीयकामसूत्रटीकायांजयमंगला
भिधानायांवैशिकंषष्ठमधिकरणंसमाप्तं। ॥श्रीरस्तु॥ ॥कल्याणम
स्तु॥ ॥शुभंभवतु॥ संवत् १९३३ना शाके ७९८ना चैत्रवदि १० रवौये
ग्रंथसमाप्तः॥आश्विनसुद ५ रवौयप्रारंभकीधोनेचैत्रवद १० रवौयेसंपूर्णं
श्रीनवानगरमध्ये। जामश्री७विभाजीराज्ये। कारभारीप्रभुनारायणराश्रोहस्ता।
श्लोक ५५२२॥ तेमांथी पंक्तिमांमुकेल अक्षरनाआग्रश्लोक ५१॥ बादबाकी ५४७१
प्रा० कोरी २ नीकोरी ५५॥ तथाकागलया २॥॥ प्र० २ कोरी ५१ नीकोरी २२॥ जुल्लेकोरी
१५७ तेनारुपैया १५॥ घो० ३१५

No 25.